र्थतो नाविद्यते च कारान्निवृत्तिरूपो मोक्षोऽपि न विद्यत इति योज्यं ॥ अतस्मान्निर्लक्षण एवात्मा तत्र प्रमा

उ·स ८२ णं बंधस्य कल्पनानिराकरणफलमाह ॥ नास्तु द्विश्वापीति ॥ खगतधर्मके बंधाभाववदस्य संसर्गेक्तत्वात् बुद्धिर
पि न चास्य संगत्वादित्यर्थः ॥ ५७ ॥ इतश्चात्मनः पारमार्थिको बंध इत्याह ॥ श्लोक ॥ सूक्ष्मैकागोचरस्य
श्च न लिप्यत इति श्रुतेः ॥ एवं तर्हि न मोक्षोस्ति बंधाभावात्कथंचन ॥ ५८ ॥ टी० ॥ सूक्ष्मेति ॥ सूक्ष्मत्वं मनोवा
गाद्यस्पृश्यत्वमेकत्वमद्वितीयत्वमगोचरत्वं निर्विशेषत्वमेतेभ्यश्च हेतुभ्यो नित्य[...]शुद्ध एवात्मा न लिप्यते
लोकदुःखेन बाह्य इति श्रुतेरित्यर्थः ॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे
तथात्मा नोपलिप्यते ॥ इति भगवद्वचनं चात्रोदाहर्तव्यं ॥ [...] ॥ एवमात्मनो नित्यशुद्धबुद्धमु
क्तस्वभावत्वं साधयतो वेदांतिन आत्मोपदेशशास्त्रानर्थक्यमित्याक्षिपंति पूर्ववादिनः ॥ एवं तर्हि शक्ति ॥
ज्ञा यदीत्यध्याहार्यं यद्येवं नित्यशु[...]त्मा तर्हि कथंचन केनापि रूपेण बंधाभावान्मोक्षोपि नास्ति बंधपूर्वक ॥
यो त्वान्मोक्षस्य तदभावे भावात्तथा च मोक्षोपदेशशास्त्रानर्थक्यमेवं स्यादिति ॥ ५८ ॥ उत्तरमाह ॥ नबु २
द्धेरित्यादिना ॥ श्लोक ॥ शास्त्रानर्थक्यमेवं स्याच्च बुद्धेर्भ्रांतिरिष्यते ॥ बंधमोक्षश्च तन्नाशः स यथोक्तो न
इ चान्यथा ॥ ५९ ॥ टीका ॥ बुद्धेर्भ्रांतिर्बंध इष्यते तस्य च प॰ ॥ त॰ आशा भ्रांतिनाशो मोक्ष इति चेष्यते न परमार्थ
त इत्यर्थः ॥ स बंधो यथा पूर्वमुक्तोऽज्ञानकल्पनामूलं संसारस्य नियामकं इति न तथैव न . चान्यथा ॥ त
[...]बंधस्य मानिवृत्त्यर्थत्वादुपदेशशास्त्रस्य न वैयर्थ्यप्रसंग इत्यर्थः ॥ ५९ ॥ अज्ञानप्र
थाचाज्ञानकल्पितबंध [...] मुपपादयति ॥ राम
[...]बुद्धिधर्मा[...]आत्मस्वरूपे बंधश्चैवात्मनि[...] ८२

बोधात्मेति श्लोक

बोधात्मज्योतिषा दीप्ता बोधमात्मनि मन्यते। बुद्धिर्नान्योस्ति बोद्धेति सेयं भ्रांतिर्हि धीगता ॥६०॥ टीका॥ बोधात्मेति॥ बोधरूपस्यात्मनो यज्ज्योतिः प्रकाशश्चिदाभासस्तेन दीप्ता भासा प्रकाशिता बुद्धिरात्मनि स्वस्यां बोधं चैतन्यं मन्यते अन्यो बोद्धा साक्षी नास्ति अहमेव बोद्धेति सा भासा बुद्धिः प्रकाशोऽनंतदविवेकाद्दृढ एव बोकर्त्रे त्यादिरात्मनि संसारे धीगता भ्रांतिरेवेत्यर्थः॥६०॥ बुद्धेरेव बोधात्मत्वं यथार्थं नीतितिपरमार्थो नैनस्यादित्तिने त्याह॥ श्लोक॥ बोधस्यात्मस्वरूपत्वान्नित्यं सं[...]नत्रोपचर्यते॥ अविवेकोप्यनाद्योयं संसारो नाम्ना इष्यते॥६१॥ टीका॥ बोधस्येति॥ बुद्धेरागंतुकत्वेन बोधव्यभिचारात् बोधस्य च विनापि बुद्धिं सुषुप्त्यादौ सद्भावादात्मस्वरूपत्वात्तत्र बुद्धौ स उपचर्यते व्यवह्रियते विवेकादित्यर्थः॥ तर्हि सोऽविवेकः सादिरनादिर्वेति विवक्षायामाह॥ अविवेको पीति पद्य

दि
विवेको एवानाद्यज्ञानकृतत्वाद[...]नोस्त[...] हि नस्येव ब्रह्मात्मज्ञानान्निवृत्तिः स्यान्न संसारस्येति भ्रमं वारयति

ध्य
संसारो नाम इष्यते कर्त्रादिधर्मकबु[...]विवेक एव संसार इत्यर्थः॥६१॥ बंधस्याज्ञानात्मकत्वे फलितमाह

[...]ने॥ श्लोक॥ मोक्षस्तन्नाश एव स्यान्नान्यथानुपपत्तितः॥ येषां वस्त्वंतरापत्तिर्मोक्षो नाशस्तु नेर्मतः॥६२॥

टीका॥ मोक्षेति॥ ज्ञानादज्ञाननिरस्तात्तत्कार्यबंधनिवृत्तिरेव मुक्तिर्नान्यथा हेयस्योपादेयस्य वा मोक्षस्यानुपपत्तितो नुपपत्तेरित्यर्थः॥ अनुपपत्तिमेव द्रढयन् पक्षांतरं निरा[...]करोति॥ येषामिति॥ येषां वादिनां स्वरूपादन्य वस्त्वंतरापत्तिरात्मनो मोक्ष इति॥ मतं तेषां नाशश्च मोक्ष इतीष्टः स्यात्॥ स्थितस्य नष्टस्य वा न्यस्यान्य त्वासंभवाद्वस्त्वंतरापत्ति[...]यतो[...]ना इति मायेन[...]नकस्यात्मिसत्व

गाविप्रयो

स्व
द्धा इति
स्वभोस
बुद्धिः

उ.स ६२ मात्यपेक्ष्यानिसमो दोषः स्यादित्यर्थः ॥६२॥ यथावस्थांतरापत्तिर्मोक्ष इति पक्षेऽनुपपत्तिरनित्यत्वापत्तिश्च
तथात्मनोऽवस्थांतरापत्तिर्मोक्षपक्षेऽपि सदोषत्वमुपसंहरन्नाह ॥ श्लोक ॥ अवस्थांतरमप्येवमविकारान्न युज्य
ते ॥ विकारेऽवयवित्वं स्यात्ततो नाशो घटादिवत् ॥६३॥ टी० ॥ अवस्थांतरमप्येवमिति ॥ अविकारित्वा
१ दात्मनोऽवस्थांतरमपि न युज्यते ॥ यदि पुनर्विकारोऽप्यभ्युपगम्यते तर्हि सति सावयवत्वमात्मनः स्यात्ततः सा
वयवत्वान्नाश एव घटादिवत् परिहार्यः स्यात्ततो भ्रांतिनिवृत्तिमात्र एव मोक्षो नान्यथा संभवतीत्यर्थः ॥६३॥
वेदांतसिद्धांतादन्या बंधमोक्षादिकल्पना वादिभिरुत्प्रेक्षिताः श्रुतिस्मृतिन्यायबाधितत्वान्नादरणीया
मुमुक्षुभिरित्युपसंहरति ॥ श्लोक ॥ तस्माद्भ्रांतिरतोऽन्या हि बंधमोक्षादिकल्पनाः ॥ सांख्यकाणाद
बौद्धानां मीमांसाहतकल्पना ॥६४॥ टी० ॥ तस्मादिति द्वाभ्यां ॥ भ्रांतिरेव परिशेषादात्मनि बंधमोक्ष
प्रतिभास इति कल्पना श्रुत्याद्यविरुद्धा ॥ अतोऽन्या बंधमोक्षादिकल्पना आसिद्धांतहेतुकल्पना चेद ना
र्तव्या कदाचनेति संबंधः अतोऽस्मात्सिद्धांतादन्या बंधमोक्षादिकल्पना हि यस्माद्भ्रांतिः भ्रमणश्रु
त्वात्तस्मान्नादर्तव्येति चान्वयः ॥ केषां वा कल्पना नादर्तव्या इत्यत आह ॥ सांख्येति ॥ मीमांसाहतेति ता
र्किचारविरुद्धा विचारासहा वा कल्पना मीमांसाहतकल्पनेत्यर्थः ॥६४॥ अनादरे हेतुमाह ॥ श्लोक ॥
शास्त्रयुक्तिविहीनत्वान्नादर्तव्याः कदाचन ॥ [illegible]तेरत्र तत्रोक्तं दोषास्त्वासां सहस्रशः ॥६५॥ रम ८३

टीका॥ शास्त्रेति॥ शास्त्रयुक्तिविरुद्धाश्च ताः कल्पना इत्याह॥ त्याज्यंते इति॥ ६५॥ इतश्च सांख्यादिक
कल्पना नादर्त्तव्या इत्याह॥ श्लोक॥ अपि निर्दोषपपत्तेश्च यान्यतोऽन्यानि चेतसः॥ त्यक्त्वा तो ह्यस्य शास्त्रोक्तौ
मतिं कुर्याद्दृढां बुधः॥ ६६॥ टी०॥ अपि निर्दोषपपत्तेरिति॥ यान्यतोऽन्यानि शास्त्राणि पृथिव्यां विविधानि वैशे
कनीयानि विद्भिर्दुर्मे॥ बुद्धिमभीप्सुभिः॥ या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निः
फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता इत्यादि निंदावचनान्नादर्त्तव्या इत्यर्थः॥ अतो मच्छास्त्रोक्तौ सत्काद
ढां मतिं बुधः कुर्यादित्यन्वयः॥ ६६॥ कथं मतिं कुर्यात् कुत्र वेत्याकांक्षायामाह॥ श्लोक॥ श्रद्धाभक्तिपुर
स्कृत्य हित्वा सर्वमनार्जवं॥ वेदांतस्यैव तत्त्वार्थे व्यासस्यापि स्मृतौ तथा॥ ६७॥ टी०॥ श्रद्धेति॥ श्रद्धा श्रुत्यु मे
क्तेऽर्थे विश्वासो भक्तिस्तत्परता तत्पुरस्कृत्यादरेण वक्तव्येत्यर्थः॥ सुगममन्यत्॥ ६७॥ एवमुक्तं परपक्ष
19 निराकरणं संक्षिप्य तत्प्रयोजनं कथयति॥ श्लोक॥ इति प्रणुन्ना द्वयवादकल्पना निरालम्बवादाश्च तथा
हि युक्तितः॥ अपेतशंकाः परवादतः स्थिरा मुमुक्षवो ज्ञानपथे स्फुरन्तु॥ ६८॥ टीका॥ इतीति॥
इत्थं युक्तितः प्रणुन्ना निराकृताः द्वयवादकल्पना भेदवादकल्पनाः सांख्यादिकल्पना इति यावत्॥
तथा निरालम्बवादा बौद्धवादाश्च युक्तितः प्रणुन्ना इत्यर्थः॥ किमर्थं तदाह॥ अपेतेति॥ मुमुक्षवः परवा
दतः परशास्त्रेभ्योऽपेतशंकास्तत्प्रामाणिकत्वशंकारहिताः संतो ज्ञानपथे वेदांतोक्तज्ञानमार्गे स्थि

उ.स.
८४

तान्स्पृशेयुरित्युक्तापीत्तियोजना॥६८॥टी०॥वेदांतविहितब्रह्मात्मदर्शनस्यैवपरमपुरुषार्थसाधनत्वा
मितितत्स्वरूपकथनपूर्वकंमुमुक्षूणांतन्निष्ठत्वमावश्यकमितिदर्शयति॥श्लो०॥स्वसाक्षिकंज्ञान
मतीवनिर्मलंविकल्पनाभ्योविपरीतमद्वयं॥अवाप्यसम्यग्यदिनिश्चितोभवेन्निरन्वयोनिर्वृतिमेति
शाश्वतीं॥६९॥टी०॥स्वसाक्षिकमिति॥अद्वयमखंडंवस्तुमात्राकारमित्यर्थः॥निरन्वयोनिरस्ताज्ञान
२ तत्कार्यसंबंधःसन्नित्यर्थः॥शाश्वतींनिर्वृतिमखंडानंदानुभवस्वरूपाविर्भावं॥६९॥यथोक्तज्ञानाधिका
रिणंसंक्षिप्यविशेषेणसारंकथयंस्तत्वनिष्ठलक्षणमाह॥श्लो०॥इदंरहस्यंपरमंपरायणंअपेतदोषैर
भिमानवर्जितैः॥समीक्ष्यकार्यामतिरार्जवेसदाननत्वहंकृत्स्वान्यमतिर्हिकश्चन॥७०॥टी०॥इदं
मेतितदिदं रहस्यमिति॥यदवाप्यशाश्वतींनिर्वृतिंरहस्यमुपदेशैकगम्यंपरमंपरमात्मतत्वप्रकाशत्वात्सर्वोत्तमंपराय
णंनिरवधिकसर्वाश्रयंपरमगतिरूपमित्यावत्॥एवंविधमात्मज्ञानंसमीक्ष्यसम्यगालोच्यदृढीकृ
त्येतियावत्॥अपेतदोषैरपगतैरिंद्रियबहिर्मुखैरभिमानवर्जितैःपांडित्यादिनिमित्तचित्तदोष
रहितैःशांतैर्दान्तैश्चेतियावत्॥एवंविधैरधिकारिभिरार्जवेऋजुभावेसर्वसमब्रह्मात्मत्वेमति
र्निष्ठासदाकार्याब्रह्मात्मतत्वमेवऋजुःसर्वदासर्वत्रैकरूपत्वात्तस्वरूपमेवार्जवंनामतस्यनिर्वि
शेषत्वादिनिर्दुष्टत्वं॥तथाचब्रह्मात्मभेदेनात्मज्ञाननिष्ठात्वनिरस्यतेभवति॥एतदेवमतिरेके राम
८४

कथंनेनविशदयातिनतत्वदृगिति॥यंकश्चनस्वात्ममतिः प्रत्यागासनोऽस्मिन्ब्रह्मणिमातिर्यस्यस ११
स्वात्ममतिः॥सनतत्वदृक्तत्वदृष्टिर्नभवतीत्यर्थः॥नदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते॥अथयोन्यांदे
वतामुपास्ते॥न्योसावन्योहमस्मीतिनसवेदेतिश्रुतेः॥७०॥एवंसम्यक्सम्यग्नेनज्ञानेनकिंफलंसाथ
तेनदाह॥श्लोक॥अनेकजन्मांतरसंचितैर्नरोविमुच्यतेज्ञाननिमित्तपातकैः॥इदंविदित्वापरमंहि
स्पष्टं वनंनलिप्यतेव्योमइवेहकर्मभिः॥७१॥टी०॥अनेकेति॥इदंज्ञानमाचार्येणकस्मैदातव्यमित्यपेक्षा
यांविस्तृतविशेषणमधिकारिणमाह॥श्लोक॥प्रशांतचित्तायजितेंद्रियायचप्रहीणदोषाययथो
क्तकारिणे॥गुणान्वितायानुगतायसर्वदाप्रदेयमेतत्सततंमुमुक्षवे॥७२॥टी०॥प्रशांतेति॥प्रशा
२० न्तचित्तायशांतिगुणयुक्तायजितेंद्रियायप्रशांतायप्रहीणदोषायानेकजन्मानुष्ठितयज्ञादिपरि
श्व तोषितेश्वरप्रसादेनसमस्तकल्मषाय॥यथोक्तकारिणेशास्त्रोक्तस्वधर्मस्वस्वधर्मानुष्ठा
य त्रेगुणान्वितायविद्याविनयार्जवादिगुणयुक्तसर्वदादीर्घकालंसततंनैरंतर्येणानुगताय
मनुसृतायएवंविधायमुमुक्षवेमोक्षमात्रेनिष्ठावतेएतदात्मज्ञानंगुणादेयंप्रतिपादयेदि
त्यभिप्रायः॥७२॥एवंविधःशिष्यामहावाक्योत्तयासिनमात्मतत्वंकथंप्रतिगच्छतिकिंवाफलं
प्राप्नोतीत्यपेक्षायामाह॥श्लोक॥परस्त्वदेहेनयथाभिमानिनः परस्पतद्वत्परमार्थमीक्षयच॥

उ.स.
८९

इदं हि विज्ञानमतीव निर्मलं संप्राप्य मुक्तोऽथ भवेत्स सर्वतः ॥ ७३ ॥ टी० ॥ परस्येति ॥ यथा परस्यान्यस्य
देहे परस्य [illegible] नाभिमानिनाऽहं ममेत्याभिमानेन न भवति ॥ तद्वत्स्वदेहेऽपि परमार्थं [illegible] वीक्ष्य देहातिरिक्त
मात्मानं साक्षीस्यात्सोऽभिमानरहितः साक्षितिया वत् ॥ चकारात् प्रतिपादकवेदान्तवाक्यपालो चे
ति रहस्यं ॥ एवं विधं इदं ज्ञानं पूर्वोक्तं साक्षात्कारं संप्राप्याथ नरैः स सर्वतो मुक्तो भवेन्निरस्ताज्ञानतत्का
र्यसंस्कारः परमानंदानुभवब्रह्मस्वरूपो भवेदित्यर्थः ॥ ७३ ॥ किमिति गुणविशेषवाद्धिष्य परीक्षणं
गुरोर्यस्मै कस्मै चित् शिष्याय कस्माद्विद्या न दातव्येति तत्राह ॥ श्लो० ॥ नहीहलाभोऽभ्यधिकोऽस्ति कश्च
न स्वरूपलाभात्स इतो हि ना[illegible] त्ततो न देयमैन्द्रादपि राज्यतोऽधिकं स्वरूपलाभं त्वपरीक्ष्य यत्नतः ॥ ७४ ॥
इति पार्थिवप्रकरणं ॥ टी० ॥ नहीति ॥ स्वरूपमात्मनस्तल्लभ्यते येनेति स्वरूपलाभस्तद्ज्ञानं तस्मात्
अभ्यधिको लाभो कश्चन कोऽपीह देवमनुष्यादिभवपरंपरायां नास्ति ॥ आत्मलाभान्न परं विद्यत इ
ति स्मृतेः ॥ स लाभः इतः एवं वेदान्तवाक्याज्ञानात्ततोऽन्यस्माद्वा शास्त्रान्तरान्न भवति हि यस्मात्तस्मा[illegible] य
त्नतः शिष्यमपरीक्ष्य स्वरूपलाभं ज्ञानं न देयं ऐन्द्रादपि राज्यतो राज्यादधिकमेति विशेषणेन प्रणा
ख्यायतां तेवासिने नान्यस्मै कस्मै चन यद्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव तत
तो भूय इति श्रुतिप्रमाण[illegible] ॥ ७४ ॥ इति पार्थिवप्रकरणवृत्तिः ॥ ७६ ॥ ॥ परपक्षान्नि[illegible]

राम
८९

करणमुखेनोक्तं मोक्षसाधनं ज्ञानं स्वप्रक्रिययापि स्फुटीकर्तुं प्रकरणांतरमारभमाणो ... देव
नाभक्तेर्विद्याप्राप्त्यंतरंगत्वं द्योतयन् प्रकरणप्रतिपाद्यार्थं नमस्कारव्याजेन संक्षिप्याह॥ श्लोकः॥ आ
त्मा ज्ञेयः परो ज्ञात्मा यस्मादन्यन्न विद्यते॥ सर्वज्ञः सर्वदृक् शुद्धस्तस्मै ज्ञेया
त्मने नमः॥ १॥ टीका॥ आत्मेति॥ आत्मा स्वरूपं ज्ञेयः स्वरूपतोऽवधा
र्यः किं घटादिवद्विषयत्वेनेत्याह॥ परो ज्ञात्मेति॥ हि यस्मादात्मा
सर्वज्ञो ज्ञेयात्परो ज्ञेयत्वधर्मरहितः तत्कुतस्तत्राह॥ यस्मादन्य
न्न विद्यते इति॥ यस्मादात्मनः स्वरूपादन्यत्परमार्थतः पृथग्भू
तं तद्धर्मो वा न विद्यते तथा च रूपादिहीनतया चक्षुराद्यगोचरत्वा
त् तुल्यसमानजातीयप्रत्यक्षव्यक्त्यंतराभावात् व्याप्तिग्रहाभावे सत्य
नुमानार्थापत्तिग्राह्यत्वाभावात् सदृशवस्त्वंतराभावेनोपमानाग्रा
ह्यत्वात् षष्ठीजातिगुणक्रियादिधर्मराहित्येन शब्दागोचरत्वात्

पु.स.
८६

राम
८६

प्रमाणाभावादविद्यामयत्वे सति नित्यशुद्धः परिपूर्ण एव चिदात्मैव स्वांतरबाह्यैरबाधारितं आ
त्मैव समस्तानादिलक्षणं ब्रह्मेति महावाक्येनाचार्याद्वगतात्मतत्त्वो मुमुक्षुः स्वस्मात्रयात्मकस्यै
व सर्वस्य दृश्यत्वात्तद्रूपोहेन तत्साक्षितया तदधिष्ठानतया चान्वयव्यभिचारीविवेकरसं ब्रह्मात्मेति सा
नुभवमापादयन्मुच्यते इत्यभिप्रेत्यानुसंधानप्रकारमाह द्वाभ्यामिति श्लो० दृष्टं बाह्यं निमील्याथ स्मृ
त्वा तत्र विहाय च अथान्मीत्यात्मनो दृष्टिं ब्रह्मप्राप्तोस्यनघ ॥ ५७ ॥ टी० बाह्यं जागरितं पंचीकृतपंच
महाभूततत्कार्यात्मकं समष्टिव्यष्टिरूपं सर्वविषयजातं दृश्यत्वाद्दृष्टं दृश्यान्वयव्यतिरेकाभ्यां का
र्यकारणान्वयव्यतिरेकाभ्यां चालोच्याथ निमील्य दृश्यं तत्सर्वं दृष्टमात्रत्वेन कार्यं सर्वं कारण
22 भूततन्मात्रत्वेन विलाप्येत्यर्थः अथानंतरं स्मृत्वा जाग्रद्दृष्टवासनाकार्यं स्वप्नदर्शनं स्मृतिस्तां
स्मृत्वा विश्ववैश्वानरसहितं स्थूलोपाधितद्रूसनामये लिंगे सूक्ष्मभूतसहिते प्रविलाप्य वासना
मयं स्वप्नमात्रमेवतदित्यनुसंधायेत्यर्थः तदपि लिंगशरीरं वा तन्नामयं प्रविहाय च वासनासहित
समनःप्राणेंद्रियसंघातस्यापि तत्कारणपंचतन्मात्राद्यन्वयव्यतिरेकाभ्यां तन्मात्रेण प्रविलाप्य तेषां चोप
त्तिक्रमवैपरीत्येन तत्कारणसाभासाज्ञानमात्रत्वेन प्रविलाप्याव्यक्तस्थानं तद्ध्यानं तत्त्वतस्त्वेत्यर्थः

उ·स· अपार्नंतरं स्फुरुपो जीवात्मक मज्ञानमात्रं यदुर्वरितं तदपि सदसत्व भिन्नाभिन्नादिप्रकार निरू

१०६ णासहत्वाद्विवांध परिकल्पितांध कारवद्युक्तिविचारितिविवेकेन बाधित्वां मनः सर्वावस्था साक्षि

तयानुसूतस्य चिदानंदमात्रस्य यदवशिष्टं ज्ञानप्रकाशस्वरूपमनुभीत्य निरुपाधिकां कृत्वा स्थितो ब्र

ह्मप्राप्नोति सत्यज्ञानादिलक्षणं ब्रह्मैव भवतीति यावत् अन्वधुगो। चिरादिक्रम ध्यानेन प्राप्नो

न तिब्रह्मणः आत्मत्वान्न गत्वा यत्ता ब्रह्मप्राप्ति रित्यर्थः ५७ अध्वगो ब्रह्म प्राप्नोतीत्युक्तमेव वि

शदयन्निरूपयन् रितेवास्य मुक्तिर्नोपसर्पेवापेक्षिकीति द्योतयति प्राणादीतिद्वाभ्यां श्लो

प्राणाद्येवं त्रिकं हित्वा तीर्णोज्ञानमहोदधिं स्वात्मस्थो निर्गुणः शुद्धो बुद्धो मुक्तः स्वतो हि सः ५८

प्राणादिस्फुरुपादीत्यर्थः स्वात्मस्थो नाचिरादिमार्गस्थः यतो निर्गुणः स्वात्म निष्ठ विलापित

टि· प्राणादिस्फुरुपादीत्यर्थः ... निरुपाधिकोऽतः स्वतः स्वभावत एव मुक्त इत्यर्थः ५८ अजोहमितिश्लो·

सकलगुण इत्यर्थः ... निरुपाधिको ... एवं च सर्वज्ञः सर्वदृक् ... इतिबुद्ध्वा न जायते ५९ टि· एवं वि

(अजोहं चामरो मृत्यु रजरोमृत एव च सर्वज्ञः सर्वदृक् ... इति बुद्ध्वा न जायते ५९ टि· एवं वि

धोहंब्रह्मास्मीति यो बुद्धोऽज्ञाननिद्रायाः निर्गतः सन्न जायते पुनः शरीरं न गृह्णातीत्यर्थः ५९ श्लो·

पूर्वोक्तं यत्नमो बीजं तन्नास्तीति विनिश्चयः तदभावे कुतो जन्म ब्रह्मैकत्वं विजानतः ६० टि· प्रबु

राम

स्य स्य पुनर्जन्माभावे हेतुमाह पूर्वोक्तमिति सुषुप्ता ख्यं तमो ज्ञानं मिथ्यादिनायत्सूर्वोक्तं मज्ञा

१०६

नेत्त्कालत्रयेपिनास्तीति निश्चयः कस्मिन्नपिकालेसतोऽज्ञानमात्रात्तिरोधानासंभवादस्य
वस्तुतोनोरूपमात्रएवतिरोधानाच्छुक्तिरजतवदित्यर्थः तदभावेऽविकारणाभावात्कार्याभावइत्य
र्थः॥ अहंब्रह्मास्मीत्यात्मानंसाक्षात्पश्यतोपिपूर्वविद्व्यवहारदर्शनात्तत्कृतधर्माधर्मनिबंधने
पुनःशरीरग्रहणंसंसारइत्याशंक्यबाधितानुवृत्तिमात्रत्वात्तज्ज्ञोनिर्व्यवहारस्यनतन्निबंधनःपुनःश
रीरग्रहणादिसंसारइतिदृष्टांतपूर्वकमाह क्षीरादितिश्लो॰ क्षीरात्सर्पिर्यथोद्धृत्य क्षिप्तंतस्मि
न्नपूर्ववत् बुध्यादेस्तथात्मासत्यात्तद्देहीपूर्ववन्नवेत्॥ ६१॥ टि॰ यथा सर्पिर्नवनीतंक्षीरादुपायेनोद्धृ
त्यतस्मिन्नेवनिःसारीकृतेक्षीरे क्षिप्तंनपूर्ववदविविक्तंभवतितथाऽसत्यात् बुध्यादेः संघातात्पृ
23 थगात्माविविक्तोज्ञानमात्ररूपेणोद्धृतोब्रह्माहमस्मीतिवाक्यात्स्वगतब्रह्मभावःपूर्ववत्पुनर्देही
देहादिसंघाताभिमानवान् तस्मिन्विद्यमानेपिनभवेदित्यर्थः साहंकारस्यहिकर्मबंधहेतुत्वंनिर
हंकारस्यतथाचोक्तंभगवता यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते हत्वापिसइमांल्लोकान्नहंतिन
निबध्यतइति॥ ६१॥ पदार्थपरिशोधनपूर्वकंवाक्यादहंब्रह्मास्मीतिप्रतीतिहेतुस्यपुनःसंसारभयशं
के कानास्तीत्यैवर्ये आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेतिश्रुतिमभिप्रेत्याह सत्यंज्ञानमितिश्लो॰
सत्यंज्ञानमनंतंचरसादेःपंचकात्परं सोहमस्त्यादिशास्त्रोक्तमहंब्रह्मेतिनिर्भयः॥ ६२॥ टि॰ रसा

उ.स. देहान्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्यकोशपंचकात्परं तदाधारभूतं ब्रह्मपुच्छं प्र
१०७ तिष्ठेति निर्दिष्टं यत्तद्देवाद्वयेनाप्यस्मिन्निरुक्ते निलयनेऽभयं प्रतिष्ठां विंदते इति श्रुतेः तं ब्रह्माहं सा
मस्मीति पश्यन्निर्भयो भवतीति योजना हि भयंकराणामपि भयंकरसमेऽपि ब्रह्मात्मभूतस्य कुतो स्तो
भयप्रसंगावकाश इति ब्रह्मतत्त्वस्य पुनः संसाराभावमुक्तेरद्वयत्वं यस्मादिति श्लो॰ यस्माद्भीताः प्रवर्तंते
वि वाङ्मनःपावकादयः तदात्मानंदतत्त्वज्ञो न बिभेति कुतश्चन ॥ टि॰ यदि वा नो पावकादय इति पाठः का
तदा ईनः सूर्य आदिपदादिंद्रमृत्युग्रहो ते तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मा
दग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति वाङ्मनःपावकादय इति पाठे उध्यात्मं वागादयो धिदैवमग्न्या
दयश्च यस्माद्भीताः प्रवर्तंते इत्यर्थः तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति
युक्तः केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति भयादस्याग्निस्तपति भयात्तपति
सूर्यः भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति हि ननु विदुषोऽपि हरिहरहिरण्यगर्भादीनां
नमस्कार्यत्वात्तदतिक्रमे भयसंभवात्कार्यशेषोऽविद्यत इति चेन्नेत्याह नामादिभ्य इति श्लो॰ नामादि
भ्यः परे भूम्नि स्वाराज्ये चेत्स्थितोऽद्वये प्रणमेत्कं तदात्मज्ञो न कार्यं कर्मणा तदा ॥ टि॰ नामवाङ्मन राम
१०७

आदिप्राणां तेभ्यः उत्तरोत्तरं भूयस्त्वेन श्रुतेभ्यः परे परस्मिन्भूम्नि सर्वव्यवहारातीते अमृते स्वस्व
रूपे अद्वये स्वे महिम्नि स्वराज्ये वेदेह मास्मि भूमा ब्रह्मेति व्यवस्थित आत्मतो विदुषः [illegible] सामग्र्य त्रिगुण
भावाभावात्केषु गुणेषु मन्त्रणाभ्यानामात्मभूतत्वोदतः परिपक्वसीन सफलनं तत्र तत्त्वानं कर्मणा किमपि का
र्यमस्तीत्यर्थः ।। ८ ।। भूम्नो नामादिभ्यः परत्वेपि कथमद्वयत्वमित्याशंक्य नामादेरवस्थात्रयरूपस्याध्यस्त
त्वेन मिथ्यात्वात् तत्साक्षिणस्तुरीयस्य भूम्नो द्वयत्वमिति वक्तुमवस्थात्रयमुखेन वदति विराडिति श्लो०
विराड्वैश्वानरो बाह्यः स्मरन्नंतः प्रजापतिः प्रविलीने तु सर्वस्मिन् प्राज्ञोऽव्याकृतमुच्यते ।। ९ ।। टी० अ
ध्यात्माधिदैवतयोरभेदाभिप्रायेण विराड्वैश्वानर इत्युक्तं विश्ववैश्वानर इत्यर्थः बाह्यो बहिः प्रत्यर
24 थ्यर्थः अंतः स्मरन्निति स्वप्ने वासनामय विषयदर्शी प्रजापतिर्हिरण्यगर्भस्तैजस इति योज्यं अव्या
कृतं मायोपाधीश्वरः अव्यक्तत्वं प्राज्ञ उच्यत इत्यर्थः ।। ९ ।। एतदवस्थात्रयात्मकं जगद्यो यत्तत्साक्षिणाव
कृतं मायोपाधीश्वरः [illegible] मात्रे बोधस्वरूपसाक्षि
कं भूतस्याहं ब्रह्मेति सम्यग्ज्ञानान्मुक्तो भवतीत्याह श्लो० वाचेति वाचारंभण मात्रे बोधस्वरूपसाक्षि
त्वे सति सत्त्वस्तश्चाहमित्येवं सर्वसंबंधो विमुच्यते ।। १० ।। टी० तः साक्षी यः परमात्मा सोहमेवेति
वं सर्वसंबंधानापासेन मुच्यत इत्यर्थः ।। १० ।। आत्मतत्त्वानाध्यस्तः संसारस्तत्त्वज्ञानान्निवर्तत इत्यु
क्ते तानयो [illegible] स्वादिताशंक्य दृष्टांतेन

तु

उ.स. प्रत्याह भास्वरूपत्वादिति श्लो॰ भास्वरूपत्वाद्यथा भानोर्नाहोरात्रे तथैवं च शानाज्ञाने मे स्यातां चिद्रूपताविशेषतः ६६

१०८ टि॰ ज्ञानाज्ञानयोरपि साक्षित्वात् कल्पितत्वे सति नात्मधर्मत्वमिति भावः ६७ आत्मनो निर्विशेषत्वादेः शास्त्र

प्रामाण्यादेव सिद्धेर्नोक्तपक्षे किंकल्पनया मनः खेदनीयमित्यभिप्रेत्याह शास्त्रेति श्लो॰ शास्त्रस्यानतिशं

क्यत्वाद्वेदस्य महत्त्वरूप ब्रह्मणो मेनहेयं स्यात्त्वं चेति च संस्मरेत् ६८ टि॰ किंतदृश्यं रूपं तत् किं वास

वीहेयानुपादेय ब्रह्मात्मतात्म निष्ठस्य फलमित्यपेक्षायां पद्यं सर्वाणि भूतानि दृश्यादिमंत्रार्थमाहाहर संबंधु

त्ति अहमेवेति श्लो॰ अहमेव च भूतेषु सर्वेष्वेको न भोग्यथा मयि सर्वाणि भूतानि पुष्पे वे न जायते ६९ स्पष्टं ६६

आत्मनो द्वितीय ब्रह्मरूपत्वेशास्त्रमर्थं तत्वदाहस निर्विशेष ब्रह्मरूपत्वे उदाहरति न बाह्यमिति श्लो॰ न

बाह्यं मध्यतो वांतार्विद्यते मम खलु कश्चित् अबाह्यांतस्त्वेषः किं चिदेकमाद्दूर सर्वप्रभः ७० टि॰ न देत्त

ह्रापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरिति श्रुतेरिस पर्य सर्वत्रिभूरिसस्याध्यः स्वयं

प्रभ इति ७० सामान्येन सर्वप्रपंच संस्पर्श रहितत्वे श्रुतिमुदाहरति नेतीति श्लो॰ नेति नेत्यादि शास्त्रे

भ्यः प्रपंचोपशमोद्वयः अविज्ञाताना दिशास्त्राद्यन्नैव तेयो हातो न्यथा ७१ टि॰ प्रपंच निषेधद्वारेणैवा

त्मा विज्ञेयो न पुनर्विषयतया सप्रपंचतया इत्यत्राप्येवं तद्विदितादथो अविदितादधि यत्सामतं तस्य

मतं मतं यस्य न वेद सः अविज्ञातं विजानतामि राम

१०८

सादिश्यात्स्त्रस्तुह्वा हरतिभविताताद्रीति ७१ तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युरिति श्रुतिरेवमहु
यादिलक्षणमात्मानं जानतो देवाः फलप्राप्तिं विघ्नंतीति चेन्मैवं देवानामप्यात्मभूतत्वाद्विदुषो विघ्न
तेर विद्वद्विषयत्वाद्रित्यभिप्रेत्याह सर्वस्येति श्लो० सर्वस्यात्माहमेवेति ब्रह्मवेदेति तं परं स आत्मा सर्व
भूतानामात्मा ह्येषामिति श्रुतेः ७२ टि० तस्मान्न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतेरित्य
र्थः ७२ एवं ब्रह्मात्मतानवेतो देवैरप्युपास्यत्वसिद्धेर्न तस्य देवपशुत्वशंकापीत्यतो न कुतश्चिद्भयमस्ती
त्यत्र श्रुतिमर्थतः पठति जीवन्नेवेति श्लो० जीवन्नेव तरमात्मानं स्वात्मानं देवमंजसा वेदोपासः स देवा
२५ नां पशुर्वा न निवर्तते ७२ टि० यदेतमनुपश्यत्यात्मानं देवमंजसा ईशानं भूतभव्यस्य न ततो विजुगु
प्सते सर्वेऽस्मै देवा बलिमावहंतीति तमेवं विद्वानमृत इह भवतीति श्रुतिभ्यस्सर्थः ७२ यदुक्तं सत्तं धा
विमुच्यत इति तत्स्फुटयत्यहमेवेति श्लो० अहमेव सदात्मस्तः शून्यस्तु मायया पांबरं इत्येवं सतस्तंधतया
वा संधातानवध्यते ७४ टि० सदात्मा सोऽस्मीति सदात्मत्वतः तस्य सन्मात्रमेति श्रुतिरिहोदाहरणं असैः
शून्यस्तुतिवाचारंभणाः श्रुतः अपोदितः यथांबरमिति दृष्टांतः संसर्गेऽप्यतलाविद्गुरुत्र दृष्टांतो निः
असंधातात्नतामिसंधि

उ॰ स॰ रहितोऽन्तस्कर इव न बध्यते बंधनाप्रहीणो भवति स यथा तत्र न राज्येन ऐतदात्म्यमिदं सर्वं इत्यादि
१०१ श्रुतिरिहोदाहार्या ७४ एवं विधतानाभावादितरे पशुभूताः शोच्या भवंतीति दर्शयन्नपप्रेमेथा
तो विदुरन्यराजानस्तेऽक्षय्यलोका भवंतीति श्रुत्यर्थमाह कृपणा इति श्लो॰ कृपणाः स्तेमर्थं वा तोवि
दुर्ब्रह्मपरं हि ये स्वराजोऽनन्यहृष्टेक्ष्यस्य त्तस्य देवा असत्स्ववशे ७५ टि॰ ये परं ब्रह्मातोऽन्यथैवोनं वे
परिसेनानात्मभूतनयाविदुस्ते हि कृपणाः शोच्या एवेति योजना अभेददर्शीतु न कृपण इत्याह स्व
सरस्तिरा राडिति एवं वि॰ जानन्नात्मक्रीड आत्ममिथुन आत्मानंदः स स्वराड् भवतीति श्रुतिरिहोदाहरणं
तस्य सर्वेषु लोकेषु कामचारो भवतीति श्रुत्यर्थं मित्रभागोदाहरणेन द्योतयति तस्येति आत्मवि॰
सर्वेभिस्वेति क्षां दसं यस्वेवं ब्राह्मणा विद्या तस्य देवा असत्स्ववशे इति मंत्रोऽस्यायमर्थः यस्त्वा
त्वां ब्राह्मणो ब्रह्मविद् एवं वेदाहमेतं पुरुषं महान्तमित्युक्तप्रकारेण ब्रह्मात्मानं विद्यात् तस्य वि
५ दुषो देवा वशगा भवंतीति ७५ स्या यथोक्तास्म तानादेव कृतकृत्यसतातस्मान्मुमुक्षुभिस्तदर्थं यत्न
वद्भिर्भवितव्यमिति तात्पर्यमाह हित्वेति श्लो॰ हित्वा जोषादि सं बंधान्बांधवान्याः सह कर्मभिः
ओमित्येवं [illegible] पृथिवी वांतरिक्षमोतं मनः राम

सहस्रांशेश्च सर्वं तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुः ॐ मित्येवं
ध्यायथ आत्मानमिति च वाक्यद्वयमत्रोदाहरणं आत्मा वाचो नाम विषयाः प्रवृत्तिपराः सर्वाधारभू
तं शुद्धं विविक्तं निर्विशेषमित्यर्थः ७६ तमेव प्रतिपत्तव्यमात्मानं श्रुत्यंतरेण विशिनष्टि सेतुमिति श्लो॰
सेतुं सर्वव्यवस्थानामहोरात्राद्विवर्जितं तिर्यगूर्ध्वमधः सर्वं सकृज्ज्योतिरनामयं ७७ टि॰ सर्वव्य
८ वस्थानां वर्णाश्रममर्यादानां सेतुं विधारकं अपायमात्मा स सेतुर्विधृतिरेषां लोकानामसंभेदा
यनैनं सेतुमहोरात्रे तरतः सकृद्विभातो ह्येवैष ब्रह्मलोक इति श्रुतिरत्रोदाहरणं ७७ पुनः किंलक्षण
मात्मानं प्रपद्यत इत्यपेक्षायामन्यत्र धर्मादन्यत्राधर्मा[illegible]स्मात् कृताकृतात् अन्यत्र भूता
च्च भव्याच्च यत्तत्पश्यसि तद्वदेति श्रुत्यर्थमाह धर्माधर्मेति श्लो॰ धर्माधर्मविनिर्मुक्तं भूतभव्यात्कृ
26 ताकृतात् स्वमात्मानं परं विद्याद्विमुक्तं सर्वबंधनैः ७८ टि॰ कृताकृतात् कार्यकारणादित्यर्थः ७८
नन्वेवं सर्वबंधनैर्मुक्त आत्मा तस्य कर्तृत्वादिश्रवणादित्याशंक्याह कर्तृत्वादेरपि सोऽहेतुब्र
वणाद्धि सद्वैभयस्वभावस्यैकस्मिन्नयोगात्स्वभावनाशः कर्तृत्वादिकं मायामयं प्रमाणविधय
मकर्तृत्वादिकं मात्मस्वभाव इति विशेषमभिप्रेत्याह विरुद्धधर्मवादिनी श्रुतीरूपं
रतिजं कं च नैव विश्लो॰

मू॰ अकुर्वन्सर्वकृत्कुर्वन्स्तिष्ठन्नप्येति धावतः मायया सर्वशक्तित्वादजः सन्बहुधा मतः ७९ टी॰
अनेजदेकं मनसो जवीय इति मन्त्रभागार्थोऽकुर्वन्सर्वकृदित्युक्तः कुर्वन्नपोपलिप्तमित्यस्यार्थः
१०९ कुर्वन्निति तद्धावतोऽन्यानत्येति तिष्ठदित्यस्यार्थमाह तिष्ठन्नप्येति धावतो वेगवतोऽन्यान्मनःप्राणा
दीनत्येतीत्यतीत्य गच्छति यत्र मनःप्राणादिर्गच्छति तत्र सर्वत्रात्मा सचैतन्यस्याभिव्यक्तिनि
यमाद्भासा तिष्ठन्नपि गच्छतीव भासत इत्यर्थः अजायमानो बहुधा विजायत इति मन्त्रार्थ
माह अजः सन्बहुधा मतः इति सर्वत्र हेतुर्मायया सर्वशक्तित्वादिति न हि मायायामसंभाव
नीयमस्तीति भावः ७९ अक्रियस्यापि क्रियावत्त्वोपचारमुक्तं दृष्टान्तेनैव प्रपंचयति राजवदि
ति श्लो॰ राजवत्साक्षिमात्रत्वात्सान्निध्याद्भ्रामको यथा भ्रामयेज्जगदात्माहं निःक्रियोऽकार
कोऽद्वयः ८० टी॰ स॰ ८० यस्मादेवमात्मा स्वतो निस्संगत्वादिस्वभावः स्वात्मन्मायाभ्यामवग
ब तस्तस्मात्तं तथैव जानीयात् तान्यपि रूपसंहरति निर्गुणमिति निर्गुणं निष्क्रियं नित्यं निर्द्वन्द्वं यदि श्लो॰
तामयं कुर्वन्नहं तथा मुक्तं न ब्रह्मास्मीति धारयेत् ८१ नैतत्पूर्वश्लोकेषु पुनरुक्तदोषावहं यतः प्रति टि॰
प्राचयत्तु नोद्बोधितात्मस्वरूपस्य कारुणिक आचार्यः क्वचित् शास्त्रतः क्वचित्स्व
रूपानुभवेन क्वचिद्विरुद्धधर्माभिनयेन पुनः पुनर्ज्ञापयति भूयोऽपि पथ्यं
वेत्तव्यमिति न्यायेन ८१ एष्ट

उक्तं प्रकरणार्थं प्रतिपत्तिसौकर्यार्थं संक्षिप्य कथयति बंधमिति श्लोकः॰ बंधं मोक्षं च सर्वं यत
द्वंद्वमुभयं हेयमेकं द्वयं च ज्ञेयं ज्ञेयाभ्यतीतं परममधिगतं तत्त्वमेकं विशुद्धं विज्ञाय यथा २
वत् श्रुतिमुनिगदितं शोकमोहावतीतः सर्वज्ञः सर्वकर्ता भवभयरहितो ब्राह्मणो वा सुख
यः ८२ टी॰ बंधं मोक्षं च सर्वं यथावत् विज्ञाय भवभयरहितः स्यादित्यन्वयः बंधः प्रमा
तृत्वकर्तृत्वादिप्रतिभासलक्षणः मोक्षो ब्रह्मस्वरूपावस्थानं सर्वमिति निःशेषं पूर्वोक्ति
प्रकारमित्यर्थः द्वंद्वमुभयं बंधमोक्षं च यतो हेतो रक्तानारक्तानां च भवतः ते अपि विज्ञाय
ति संबंधः तथा एकमनुवृत्तिकारणं द्वयं व्यावृत्तिकार्यं च यतः ज्ञेयं विषयभूतं तत्सर्वं हेयं
बाध्यं विज्ञायेत्यन्वयः ज्ञेयाभ्यतीतं दृश्यात् सम्यक्पृथक्कृतं परमं निरतिशयं विशुद्धं एकं २
ब्रह्माद्वंद्वं तेष्वधिगतं तत्त्वं परमार्थं तदपि यथावद्विज्ञाय आत्मत्वेनोपादाय किंलक्षणं श्रुतिमुनिग
दितं श्रुतिवाक्येन मुनिना गुरुणोपदिष्टमित्यर्थः एवमात्मानात्म तत्त्वं ज्ञात्वा अनात्मा मोहे नास
तत्त्वनिष्ठः शोकमोहावतीतः स्यात्तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतेः सर्वं हि
ब्रह्मतज्ज्ञानेन सर्वज्ञः स्यात् सर्वं खल्विदं ब्रह्मेत्येकं करोतीति सर्वकर्ता स्यात्

उ·स· धा च समुक्तविषया श्रुतिः अहं विश्वं भुवनमभ्यभवामिति दैर्घ्यमानार्थमभ्यभवमभिभूतवानस्म
११० सात्स्वरूपतत्ववानस्मीति श्रुत्यर्थः भवभयरहितः न बिभेति कुतश्चनेति श्रुतेः ब्राह्मणो मुख्यया वृत्त्या ब्रा
ह्मणशब्दाभिधेयः अमौनं च मौनं च निर्विद्याथ ब्राह्मण इति अथ एतदक्षरं गार्गि विदित्वास्मा
ल्लोकात्प्रैति स ब्राह्मण इति श्रुतेः अवाप्तकृत्स्नः प्राप्तसर्वक्रियाफल इत्यर्थः सोऽश्नुते सर्वान्कामा
न्सह ब्रह्मणा विपश्चितेति श्रुतेरित्यर्थः ८२ एवमात्मानं जानतः कृत[illegible] स्फुटयति न
स्वयमिति श्लो० न स्वयं स्वस्य नान्यस्य नान्यस्यात्मनश्च हेयगः उपादेयो न चाप्येवमिति सम्यग्
मतिः स्मृता ८९ स्वयमात्मा स्वस्य न हेयगः स्वकर्मकोटौ पतितो न चाप्युपादेयः एकस्मिन्क
र्मकर्तृत्वासंभवात् स्वरूपस्य स्थितो नाशो वा स्वविषयहानोपादानयोरसंभवाच्च तथान्यश्च
न स्वस्य हेयगोऽहं तेनान्यस्यैवाभावात् नोप्युपादेयोऽत एव तथान्यस्यापि स्वयमुपादेयो हेयगो
वा न भवत्यात्मान्तराभावात् अनात्मनश्च बाधितत्वादचेतनत्वाच्चेति योजना इत्येवं या निष्ठा सास
म्यग्मतिः सम्यग्ज्ञानं स्मृता ब्रह्मविद्भिरित्यर्थः ८२ कूटस्थचेतनमेकरसं पूर्णं वस्तु निहाना
यसंभवात् निराधासं परब्रह्मैवास्मीत्येवंविधा या धीः सा सम्यग्मतिरिति हेतुमाहात्मप्रत्यायि राम
केति श्लो०
११०

आत्मप्रसादिकाह्येका सर्ववेदांतगोचरा ताभिर्वै तां विमुच्यंते सर्वसंसारबंधनैः ८४ टि आ
त्मानं ब्रह्मत्वेन प्रसादयतीति आत्मप्रसादिका हि यस्मादेकं मतिः स्वानुभवसिद्धेति
वा सर्ववेदांतगोचरेति प्रमाणमूलत्वमस्या दर्शयति एतां लब्ध्वा सर्वसंसारबंधैर्वि
मुच्यंते कृतकृत्या भवंतीत्यर्थः तथा भगवद्वचनं इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ
एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारतेति ८४ प्रकरणोक्तं शास्त्रं मिदानीं प्रशंसन्नुपसं
हरति रहस्यं सर्ववेदानां देवानां चापि ह्येपरं पवित्रं परमं
पाव्यं त्वं हृद्यमिति रहस्यमिति श्लो० रहस्यं सर्ववेदानां देवानां चापि ह्येपरं पवित्रं परमं
दुस्तत्त्वदेतत्संप्रकाशितं ८५ टि० रहस्यमुपदेशव्यतिरेकेण विशेषज्ञाचार्यवाक्यानुरूपो
भवेदसर्ववेदाय ब्रह्मनामनंतिचक्रे तेः देवैरत्रापि विविकिसितं पुरा न हि सुविज्ञेयमणुरे
षधर्म इति श्रुतेर्देवानां चापि रहस्यमित्यर्थः परं सर्वोत्तमं पवित्रं पावनं क्षीयंते चास्य कर्मा
णि एवं विदि श्लोका पापं कर्म न लिप्यते इत्यादिश्रुतेः हि यस्मात्परमं परमार्थरूपं निरतिशयानं
दप्रकाशमिति यावत् यदेवं स्वरूपं सम्यग्ज्ञानं तदेतत्सम्यक्प्रकाशितं प्रकटीकृत
मस्मिन्प्रकरण इत्यर्थः ८५

28

उ॰ स॰ एतत्सर्वगोपनीयत्वं सूचयन्नितिनैतदिति श्लो॰ नैतद्देयमशान्ताय रहस्यं ज्ञानमुत्तमं विस्मा
१११ यप्रदातव्यं शिष्यायानुगताय च ८६ यद्यप्युक्तवत्वेन दुर्धरत्वात् तद्धारणसमर्थमधि
५ कारिणं विशिषन्नेषिकारिभ्यो विवेचयन्निति नैतद्देयमिति ८६ यस्मादेवंलक्षणं ज्ञानमा
चार्यैः कृतकृत्येन प्रलोभादिना ज्ञानं प्रयच्छति तस्मान्मुमुक्षुरमानित्वादि शिष्यगु
णयुक्तः स्यात् यथाचार्यः कृपया विद्यां दद्यादित्येवमर्थमाह दद्यात्त इति श्लो॰ दत्त
श्चात्मनो ज्ञानेन निःक्रियोऽन्यो न विद्यते ज्ञानमिच्छेत्ततो रे तस्माद्युक्तः शिष्यगुणैः सदा ८७
टि॰ न विद्यते यस्मादिति योज्यं तस्माच्छिष्यगुणैः सदा युक्तो ज्ञानमिच्छन् संपादयेत्तत्त रे संसा
रमिति शेषः ८७ आदौ विद्योपसंहारे च देवताचार्यनमस्कारो तद्वक्तेः विद्यांप्रयंतत्व
वेदव्यापनाय कार्याविति शंपति श्लोकद्वयेन ज्ञानमित्यादिना श्लो॰ ज्ञानं तेयं तथा ज्ञाताय
स्मादन्यन्न विद्यते सर्वज्ञः सर्वशक्तिर्यस्तस्मै ज्ञानात्मने नमः ८८ टि॰ ज्ञानात्मने विसदानंद
पायेत्यर्थः ८८ विद्ययेति श्लो॰ विद्यया तारिता स्मो ये जन्ममृत्युमहोदधिं सर्वज्ञेभ्यो नमः से
भ्यो गुरुभ्यो ज्ञानसं... ८९ इति ... ८९ इति श्री... प्रकरणं समाप्तम् ॥ श्री ॥ राम

पूर्वस्मिन्प्रकरणे ब्रह्मात्मविषयमपरोक्षज्ञानं मोक्षसाधनं वेदांतेभ्यो भवती
त्युक्तं तदयुक्तं वेदांतानामपि स्वर्गकामादिवाक्यवत् परोक्षज्ञानजनकत्वाद्धे
तोः परोक्षज्ञानानंतरं प्रसंख्यानमेवेष्टव्यमिति केचित्प्रतिपेदिरे तन्मतनिराकरणे
न पूर्वोक्तं सर्वं सिद्धं तन्मतमनुपपन्नमितः स्फुटमुपपादयितुं प्रकरणांतरमार
भमाणो देवतानमस्कारव्याजेनांतःकरणतद्वृत्तिभावाभावसाक्षिणं कूटस्थं
चिदेकतानमेवात्मानं नित्यापरोक्षं वेदांताः ब्रह्मेति प्रतिपादयंतो न परोक्षं ब्रह्म
समर्पयंतीति सूचयन् प्रकरणप्रतिपाद्यं दर्शयति येनेति श्लोकः येनात्म
नाविलीयंते उद्भवंति च वृत्तयः नित्यावगतये तस्मै नमो धीप्रत्ययात्मने १ टी:
वृत्तयो धीपरिणामाः अंतःकरणचक्रमिवाग्न्यात्मना येन चैतन्यज्योतिःस्वरूपे
29 ण विलीयंते सुषुप्तौ अवस्थांतरे उद्भवंति च चिदात्मव्याप्ता इत्यर्थः धीप्रत्ययाः
साभासबुद्धिवृत्तयस्तासां प्रमात्मने तद्रूपासाक्षिज्ञानायेत्यर्थः नित्यश्चासाववगति
श्चेति विग्रहः १

उ.स.टी. इदानीं सोक्तं पञ्चमुमुक्षूणां विश्वासार्थं स्वाचार्यगुणोपवर्णनपूर्वं संप्रदायशुद्धिं कथयति
११२ प्रमथ्येति श्लो० प्रमथ्य वज्रोपमयुक्तिसंभृतैः श्रुतेररातीन् शतशो वचोऽसिभिः ररक्ष
वेदार्थ विशालधीर्निधिं नमाम्यतोऽस्य गुरोर्जसंपुसे २ टि० संमतैरभेदतैयाघटितैः श्रुते
र्वचोऽसिभिर्वेदांतवाक्यरूपनिस्त्रिंशैररातीन् द्वैतारण्यवासिनोऽद्वैतरत्नापहारिणः श
त्रून् प्रमथ्य समूलमुन्मूल्य यो विशालधीरप्रतिहतदीर्घबुद्धिर्वेदांतमञ्जूषागतं निधिं
निधीयतेऽस्मिन् सर्वमिति निधिरद्वयब्रह्मात्मतत्त्वं ररक्ष तं श्रीयतीन्द्रं गुरोर्गौडपादसंयते
परमगुरवे नमः इति योजना २ एवं नमस्कारव्याजेन प्रकरणार्थं स्वसंप्रदायशुद्धिं
कृत्वा तत्त्वमस्यादिवाक्यादेवापरोक्षज्ञानमात्मनीति प्रकरणसिद्धांतं तावदाह निःसमु
क्त इति श्लो० निःसमुक्तः स्वदेवास्मीत्येवं चेन्न भवेन्मतिः किमर्थं श्रावयेदेवं मातृव
च्छ्रुतिरादरात् ३ टि० स्वदेवाहमहमेव स्वदस्मि निःसमुक्त इत्येवं चेदपरोक्षा मतिर्वेदांत
वाक्यान्न भवेत्तर्ह्येवं शिष्टुवन्निर्देशेन तत्त्वमसीति श्रुतिः किमर्थं कस्मादादरतो आदर
वती पुनः पुनर्मातृवत्सुतेभ्यो हितैषिणी श्रावयेदित्यर्थः ३ निःसापरोक्षस्वभावात्मस्वरू
पत्वाच्छुक्रबोधादेवा ... तात्पर्यं निवृत्तिफलकत्वात् राम

घृतइत्यत आह सिद्धदेवेति श्लो॰ सिद्धदेवाहमित्यस्मा बुद्धसर्पधर्मो निषिध्यते रज्जा
मिवो हि धीर्भ्रान्त्या तत्त्वमस्यादि धिया सनैः ४८ ॥ अहमित्यनेअहंशब्दलक्ष्याद्यपरोक्ष
तया स्वतः सिद्धरात्मनः प्रकाशा बुद्धसर्पधर्मः परागर्थो हिं कारादिस्तत्त्वमस्यादि
सनैर्भ्रान्त्या सहितैः शोधितापैरितियावन्निषिध्यते भ्रमगृहीतपा[illegible] सहस्येवा
कारविज्ञापनेनात्मतत्त्वं प्रतिपाद्यत इत्सर्थः तत्र दृष्टान्तार्थः स्पष्टः ४९ तन्निवृत्तिं दृष्टा
ताभ्यां सपष्टयति शास्त्रेति श्लो॰ शास्त्रप्रामाण्यतो ज्ञेया धर्मादेरस्तिता यथा विषा
पोहो यथाध्यानात् त्कृतिः स्यात्पाप्मनः स्तथा ५० ॥ १४ ॥ निस्तापरोक्ष्यात्मैव ब्रह्म तदव
गमेश्चानर्थनिवृत्तिहेतुरित्येतत्क्रमेण दृष्टान्ताभ्यां साधयति शास्त्रेति तथा ब्रह्मण
एवात्मत्वेनास्तिता अनेन जीवेनात्मनानुप्रविश्य तत्त्वमसीति शास्त्रप्रामाण्यतो
30 यति दार्ष्टान्तिके योऽयं ध्यानाद्गरुडादिमन्त्रबीजस्मरणाद्विषापोहः सद्यो विषनिवृ
त्तिस्तथा पाप्मनोऽविद्यमानर्थरूपस्य स्वयाथात्म्यतत्त्वावगममात्रेण सद्य एव निवृ
तिः स्यादित्यर्थः ५० नन्वाक्योपाहं ब्रह्मास्मीति प्रत्ययवदहं करोमीत्यपि प्रत्ययोऽनु

श्लो॰ सहस्राहंकरोमीति प्रत्यया वास्तु स्वाश्रिकौ तयोरज्ञानजस्येव त्यागे युक्त तरोः तः

उ·स·टी भवसिद्धस्तत्र कोहेतुरयमेवार्थरेणबाध्यत इत्यत्रेतिशंकते सद्ब्रह्माहमिति तत्र नियाम
२ ११२ कंहेतुं वदँउत्तरमाह तयोरिति युक्ततरः इतितस्यायमर्थः यथापूर्वप्रवृत्तयागवि
नियोजकश्रुत्यापश्चात्प्रवृत्तालिंगादयोप्राप्ता एवबाध्यंते यथावापूर्वमेव प्रकृतौवि
कृतावतिदेशप्राप्तानामंगानां विकृतिगतविशेषापदेशेनपाश्चात्येनबाध इ
तियुक्ततेष्यनियमोबाध्यबाधकयोः पूर्वापरीभावस्यनतथास्यन्यायस्येतियुक्ततर
श्लो· इत्युक्तमिति ६ सदस्मीतिप्रमाणोत्थाधीरन्यात्तन्निभोद्भवा प्रत्यक्षादिनिभा
साद्वेबाध्यते दिग्भ्रमादिवत् ७ टी· अत्रकः प्रमाणजः प्रत्ययः कोवाद्भा
नजइतिआकांक्षायांविविच्यदर्शयति सदस्मीति सदस्मीतिधीस्तत्वमसीति
निर्दुष्टवाक्यप्रमाणोत्था अन्यात्कर्ताहमित्यादिधीस्तन्निभोद्भवाप्रमाणाभा
स्कं सत्समुद्भूताऽविवेकादिदोषोद्भवादित्यर्थः श्लो· कुरुभोक्तेतियच्छास्त्रंलोकबुध्य
नुवादितत् सदस्मीतिश्रुतेर्ज्ञाताबाध्यते न्यायेनयेनधीः ८ टी· वाक्यजन्यज्ञान
स्यापिप्रत्यक्षाभासबाधनं दृष्टांतेनबुद्धिमारोहयति प्रत्यक्षादीति ननु ब्रह्म ाणि ११२

स्मीतिबुद्धिवत्कर्तृत्वादिबुद्धेरपिसत्यंवदधर्मेऽत्र सहिकर्ता भोक्तेस्याहुर्म
नीषिणइत्यादिवचनाच्छास्त्रसिद्धत्वंतुल्यमितिकथंतस्याःबाधत्वमित्याशंक्या
ह कुरुभोक्तेतीति एवंस्थाने भिन्नानांतदभिन्नसंगतिहीनानामपिकर्ता
भोक्ताहमस्मीतिधियःसिद्धत्वात्कुर्वित्यादिशास्त्रंलोकसिद्धोऽर्थेऽनुवादिना ५
नधिगतार्थबोधकमित्यर्थःसदस्मीतिधीस्तु श्रुतेरनन्यसिद्धार्थायाः सका
शाज्जातेत्यर्थः तस्मात्तयैव निरवकाशया सदस्मीति श्रुतिजातयाधिये
वान्यासावकाशानुवादवाक्यानुजन्या बाध्यते बाधत एवेतिवान्वयः ८
श्लो॰ सदेवत्वमसीत्युक्ते नात्मनो मुक्ततां स्थिरां प्रपद्यते प्रसंख्यानमतो युक्त्या
नुचिंतयेत् २ टी॰ सदेवंवाक्यादेवापरोक्षज्ञानमात्मविषयमुत्पद्यते तच्च
31 निरपेक्षमेवानर्थनिवृत्तिहेतुरितिस्वमतमुपन्यस्यस्वयुष्ममतमुत्थाप
यति सदेवेति प्रसंख्यानशब्दार्थं युक्त्यासहाभ्यसेदित्यर्थः श्लो॰ सदु रु
क्तेन गृह्णातिवाक्यार्थज्ञोऽपियो भवेत् अपेक्षते त एवान्यद्वो चामद्वयहितं २०

 उक्तमेवसाधयति सकृदिति योपिवाक्यार्थज्ञो वाक्यार्थंसकृदुक्तं नगृह्णा
 तिनजानाति नसम्यक्प्रतिपद्यते यतो तएवान्यसहकारिभूतमपेक्षतेयदु
 पेक्षतेतद्द्वयंवाक्यानुचिंतनंयुक्त्यालोचनंच पूर्वश्लोकेद्वयमेवोक्तमित्यर्थः
२० श्लो· नियोगोप्रतिपन्नत्वात्कर्मणांस्यथा भवेत् अविरुद्धो भवेत्तावद्यावत्सं
वेद्यताद्दृढा २१ टी· ननुतत्त्वमस्यादिवाक्येषु विधेरनुपलंभामहेब्रह्मात्मभाव
स्यवस्वत एवसिद्धेर्मुमुक्षोर्नियोगोपिनघटते इत्यतआह नियोगेति वाक्यमा
त्रादेकात्म्यस्याप्रतिपन्नत्वात्साक्षात्कारताभावात्तावन्नियोगोविरुद्धोभवेद्याव
संवेद्यताब्रह्मात्मैकताद्दृढादृढत्वेन प्रतीयतइतियोजना सनियोगः कर्मणाम
ग्निहोत्रादीनांयथा भवेद्वाक्यावगतानामपि फलप्राप्तयेइतिदृष्टांतार्थः
२१ श्लो· चेष्टितंचयथा मिथ्यास्वच्छंदः प्रतिपद्यते प्रसंख्यानमतः कार्यंया
वदात्मानुभूयते २२ टी· किंचविधिमंतरेण चेद्ब्रह्मात्मैक्यंवाक्यात्स्वयमेव
प्रतिपद्यतेतत् ज्ञायमानियमादिकमनुष्ठीयमानंमिथ्यास्यादुपकाराभा
वादित्याह चेष्टितमिति चेष्टितमनुष्ठितंयमादिस्वच्छंदः स्वेच्छावानांनियु

ना इति यावत् प्रतिपद्यते चेदित्यध्याहारः आत्मानुभूयते साक्षात्क्रियत इत्यर्थः
२२ श्लो· सदस्मीति च विज्ञानमक्षजं बाध्यते ध्रुवं शब्दोत्थं दृढसंस्कारदोषैश्चा
कृष्यते बहिः २३ टी· इतोऽपि प्रसंख्यानं बाधितो नु हेयमित्याह सदस्मीति सदस्मीति
शब्दोत्थं विज्ञानमक्षजः प्रत्यक्षप्रत्ययः कर्ता भोक्ता इत्येवमाद्याकारे बाध्यते ध्रुवं
निश्चितमेतत् अक्षजस्य प्राबल्ये हेतुगर्भविशेषणं दृढसंस्कार इति किं च तेन मु
मुक्षोर्दोषै रागादिभिश्च बहिराकृष्यते बहिर्मुखी क्रियते ततः प्रसंख्यानं दोषनिवृत्त
ये च वक्तार्यमित्यर्थः २३ श्लो· श्रुतानुमानजन्मानौ सामान्यविषयौ यतः प्रत्यक्षव
दृजौ वद्यं विशेषार्थौ निवारयेत् २४ टी· न केवलं चिरं निरूढवासनाघटितत्वे
न प्रत्यक्षप्राबल्यम् अपि तु विशेषविषयत्वाच्चेत्याह श्रुतेति श्रुतः शब्दोऽनुमा
३२ नं लिंगज्ञानं विप्रलिप्साभ्रान्त्योरपि तत्र संभाव्यमानत्वादैहंतरे संभवाच्च प्रत्य ईहंतरे
क्षस्य तदभावाद् युक्तं बाधकत्वमित्यर्थः २४ श्लो· वाक्यार्थप्रत्ययी कश्चिन्निर्दुः
खो नोपलभ्यते यदि वा दृश्यते कश्चिद्वाक्यार्थश्रुतिमात्रतः २५ टी· यदि वा

उ·स·टी· क्यार्थज्ञानमात्रात्कृतकृत्यताकस्यचिद्दृश्यते तु तदा प्रसंख्यानमनर्थकं स्यान्न
११५ तु तथा कश्चिद्दृश्यते अतः प्रसंख्यानमावश्यकमित्याह वाक्यार्थेतिद्वाभ्यां द
द्वैतपरस्य ऋषिर्वामदेवः प्रतिपेदे तद्वास्य विजिज्ञासिपादो वाक्यार्थज्ञानमात्राद्वाम
देवादिः कृतकृत्यो दृश्यतु इति चेत्तत्राह यदिवेति दृश्यते निर्दुःखइत्युत्तरश्लोकगते
नान्वयः १५ ।श्लो· निर्दुःखोतीतदेहेषु कृतभावोनुमीयते चर्योनोशास्त्रसंवे
द्यास्यादनिष्ठतथासति १६टी· वाक्यार्थश्रवणमात्रात्कश्चिद्यदि निर्दुःखो दृश्य
ते श्रुतिपुराणादौ सोतीतदेहेषु कृतभावोनुष्ठितप्रसंख्यानोनुमीयते निर्दुःखि
त्वलिंगेनेत्यर्थः किंच सकृद्विज्ञानवाक्यार्थस्यविध्यनभ्युपगमे नास्माकं चर्यापु
रमहंसाश्रमाचारो शास्त्रसंवेद्यास्यात् शास्त्रविहितानस्यात् तथासति अनिष्ट
स्यात् यस्याश्रमचर्यापरित्यागेप्यारूढपतितोनभवेदिति अनिष्टप्रसंगइत्यर्थः
१६ श्लो· सदसीतिफलंचोक्ताविधेयं साधनंयतः ततदन्यप्रसंख्यानात्प्रसिद्धार्थ ११म
११५

भिरेष्यते १७ टी॰ कस्तर्हि प्रसंख्यानविधिपक्षे सिद्धब्रह्मोपदेशस्यार्थः स्यादित्यत
आह सदसीति स्वसत्त्वब्रह्मास्तीति वर्त्तमानोपदेशेन फलमिदं साधनं विधानार्थ
मुच्यते यतो यस्मात्सर्वत्र फलमुक्त्वा साधनं विधेयमतो ब्रह्मैक्यकामः प्रसंचक्षी
तेति सार्थको विधिर्भवेदित्यर्थः १७ श्लोक तस्मादनुभवायैव प्रसंचक्षीत यत
नः युञ्जन्साधनतत्साध्यं विरुद्धं शमनादिमान् १८ टी॰ प्रसंख्यानमेव किमिति
विधीयते ज्योतिष्टोमादि कस्माद्दृष्टफलभावायन विधीयते इत्यत आह तदन्यदिति
प्रसंख्यानादन्यदिह वेदान्तेषु प्रसिद्धार्थसिद्धार्थाभिव्यंजने समर्थं साधनं यत्तन्ने
ष्यते ज्योतिष्टोमादिर्व्यंजकत्वसामर्थ्याभावादि अर्थः पूर्वपक्षमुपसंहरति तस्मादिति
किंकुर्वन्साधनतत्साध्यविरुद्धं यजन् साधनं प्रसंख्यानं तत्साध्यं तत्फलमात्मै
33 क्यसाक्षात्कारः तद्विरुद्धकर्मनिष्ठत्वं शमनं शमः आदिपदाद्दमोपरत्यादिग्रहः
शमादियुक्तश्च सन्नित्यर्थः १८ श्लो॰ नैतदेवं रहस्यानां नैरन्त्यवसानतः क्रिया
साध्यं पुरा श्राव्यं न मोक्षो नित्यसिद्धतः १९ सिद्धान्तमुपक्रमते नैतदेवमिति कि
ति

म. टी. वेदांतेषु प्रसंख्यानं साक्षादधीयते किंवा वर्तमानोपदेशेन फलवचनानुपपत्त्या कल्प्य
११६ त इति तत्र नाद्य इत्याह रहस्यानामिति उपनिषद्वाक्यानामित्यर्थः नेति नेतिद
स्य निषेधद्वारा तदवधिमात्रे ब्रह्मात्मस्वरूपे पर्यवसानदर्शनादेशांतानां न वि
ध्यर्थतेत्यर्थः द्वितीयं प्रत्याह क्रियासाध्यमिति यत्तु क्रियासाध्यं फलं सुरा न
नि पूर्वकांडे श्राव्यं नो परं वस्तु अत्रेक्ष्यमाणो मोक्षो न क्रियासाध्यः कुतो नित्य
सिद्धत्वात् साध्यत्वादित्यर्थः १९ श्लो. पुत्रदुःखं यथाध्यस्तं पित्रा दुःखे स्व आत्मनि
अहंकर्तरि तथाध्यस्तौ नित्यादुःखे स्व आत्मनि २० टी. तत्त्वमस्यादिवाक्यमपरो
क्षा ह्रीति यत्र ब्रह्मात्मज्ञानं द्वारा तत्ज्ञानं तत्ह ध्यस्तं च दुःखित्वादि संसारं निवर्तय
तीति विक्रमज्ञानाध्यस्तं दुःखादी यत्र दृष्टांतमाह पुत्रेति अदुःखे ज्वरादिदु
खरहिते इत्यर्थः दार्ष्टांतिकमाह अहंकर्तरि नित्यादुःखे स्वदुःखादिसंसारर
हिते स्वस्वरूपे आत्मनि निरुपाधिके अहंकारः साभासांतःकरणे विविक्ते दुःखादि
धर्मको विवेकलक्षणया विचयातथ्या प्यस्त इत्यर्थः अहंकर्त्रीति पाठे स्व आत्म राम
११६

नोस्त्य दुःखादिरित्यशेषः २० श्लो· सोध्यासो नेतिनेतीति प्रास्तवस्तुनि षिध्यते भू
योध्यासविधिः कश्चित्तु तन्निन्नोपपद्यते २१ टी· आत्मनो ब्रह्मस्वभावाज्ञानेना
ध्यस्तः संसारस्तत्स्वभावज्ञानमात्रान्नेति नेति तत्त्वमसीति वाक्यात्स्वतोऽध्यन्निवर्त्तते त
दात्मनः सर्वक्रियाधिकारनिवृत्तेः कृपुत्स्येवं पुनरध्यासबीजाभावात्कस्यचन प्र नरू
संख्यानविध्यवसर इति फलितमाह सोध्यास इति प्रास्तवाहितिवति प्रयोगात्सूक्ष्मत्वसा
प्राप्य भावादारोपितत्वं दृढयति २१ श्लो· आत्मनीह यथाध्यासः प्रतिषेधस्तथैव चे.
न्मलाध्यासनिषेधो खक्रियेते च तथा बुधैः २२ टी· नन्वविषये ब्रह्मात्मनि विषयधर्माणां,
दुःखित्वादीनां कथमध्यासः संभाव्यते यतः पुरोवस्थिते विषयभूते शुक्तिकादौ रजताद्यध्या
सो दृष्ट इत्याशंक्य व्यभिचारान्नैवं नियम इत्याह आत्मनीति यथा देहव्यतिरिक्तात्मवा
दिनामात्मनीह पुरस्थित देहजरामरणाद्यध्यासस्तन्निषेधश्च यथा चेंद्रियाविषयेपि स
34 देहमलाध्यासनिषेधावबुद्धैः क्रियेते तथैव च प्रत्यगात्मनि ब्रह्मैक्यरूपाविषये संसाराध्या
सनिषेधौ स्यातामित्यर्थः आत्मनीह यथाध्यास इति पाठे दर्शनांतरासिद्धांतिकपरतयोत्

११८ राधपूर्वार्द्धैस्तिद्धार्थौ अधिष्ठानस्वरूपमात्रस्फुरणमध्यासेपेक्ष्यते नविषयवे :
नुस्फुरणेनादिहस्य प्रकारो आत्मनिश्चतः सिद्धमिति नानुपपत्तिरिति भावः २२
तू श्लो· प्राप्तश्चेत्प्रतिषिध्येत मोक्षोनित्योभवेद्ध्रुवं अतोप्राप्तनिषेधोयं दिव्यांति
चयनादिवत् २३ टी· प्राप्तवस्तु प्रतिषिध्यत इत्युक्तं प्रपंचयति प्राप्तश्चेदिति
प्रमाणसिद्धश्चेत्संसारः प्रतिषिद्धेत तर्हि संसारबंधनिवृत्तिरूपस्य मोक्षस्योत्तुक गं
त्वात् ध्रुवं निश्चितं मोक्षोनित्योभवेत् परमार्थवस्तात्मगतस्य बंधस्य परमार्थत्वे सति त
वृत्तौ तस्यात्मनो वस्थांतरापत्त्या विकारित्वादनित्यत्वमावश्यकं तथानादिभावरूप
स्य बंधस्य परमार्थस्येतन्निवृत्तिरेवासंभाविनी साहित्याभ्युपगमेतु तत्स्यात्सनेच कृत
त्त त्वान्निवृत्तसजातीयस्य पुनः [illegible] स्मिन् पूर्ववदुत्पत्त्युपप[illegible]त्तेरनित्यो मोक्षः प्रसज्येतेत्येवे
ति बंधस्या[illegible] विद्यकत्वमवश्यमेष्टव्यं तस्य च ज्ञानादेव निवृत्तेर्निरर्थकं प्रसंख्यान
मितिसभिप्रायोपसंहरंति अतइति यथानांतरिक्षेन दिव्या प्राप्तश्चेतव्य इति पृथिव्या
मिवा[illegible]मिचयनमंतरिक्षादाकारोप्याप्राप्तमेव प्रतिषिध्यते तथा संसारबंधराहि त्यम

त एवासन्निलरशोपनिबंधाविति द्रष्टांतेनाह दिव्यमनीति आदिपदादाकाशमा
लिन्यं लोकिकं गृह्यते २२ आलनिबंधसंबंधबोधकप्रमाणाभावादपिन+
श्लो- संभाव्यो गोचरे शब्दः प्रत्ययो वा न चान्यथा नसंभाव्यो तदुत्सत्वादहकं तु ल
थैव च २४ टी+ तत्र बंधस्य सत्यताप्राप्तिरस्तीत्याह संभाव्य इति अयमर्थः आ
त्मनिबंधसंबंधबोधकं प्रमाणं शब्दप्रमाणांतरं वा सर्वथापि नोपपद्यत इत्याह
शब्द प्रत्ययो वेति प्रत्ययः प्रमाणांतरजन्यः शब्दो वा प्रत्ययो वा लोके गोचरे विष
ये संभाव्यः संभावनायोग्यो न चान्यथा विषयत्वायोग्ये तथा च षष्ठी जातिगुणक्रि
यादिशब्दप्रवृत्तिनिमित्तरहितस्यात्मनो न शब्दगोचरत्वं संभाव्यते येनायमात्मा
संसारीति बोधः शब्दादुत्पद्येतेति तथा रूपादिहीनत्वान्न बाह्येंद्रियवर्गस्तस्मिन्नुक्
३५ मत्ते अत एव न तत्स्वरूपसंबंधतया लिंगविशेषाग्रहणादनुमानार्थापत्ती तस्मिन्
संभवतो नयबाधभावान्नोपमानं भावरूपत्वादेव नानुपलब्धिरपीति प्रतीतिमात्रे
परिशिष्यत इति न प्रमाणसिद्धो बंधसंबंध इत्यतो न संभाव्या वात्मन्यपि शब्द

उ-स्टी- प्रत्यया वित्ति किंच शब्दप्रत्यययोः प्रमाणत्वाभिमतयोस्तथैव नाहं कर्तुः प्रमातृत्वाभि-
११८ मतस्य च तदात्मत्वोऽप्यात्मतान्तत्गोचरत्वमुपपद्यते नहि अगन्तुकयोः शब्दप्र-
त्यययोरहंकर्तुर्वाचिदात्मनः पृथक् स्वरूपमस्तित्वात्मनि तु क्रियानुपपत्तिरित्यर्थः
२४ श्लो- अहंकर्त्रात्मनि न्यस्तं चैतन्ये कर्तृतादि यत् नेति नेतीति सर्वं साहंकर्त्रा नि- ति ४
षिध्यते २५ टी- तस्मादध्यस्तनिषेध एव वक्तव्य इति सिद्धमित्याह अहमिति
चैतन्ये चित्स्वरूपे [illegible] आत्मनि यदहंकर्त्रा सा भासातः
करणाविवेकेन कर्तृत्वादि न्यस्तमारोपितं तत्सर्वं नेति नेतीति निषिध्यते साहंकर्त्रा
अहंकर्त्रा सहेत्यर्थः २५ श्लो- उपलब्धिः स्वयंज्योतिर्दृशिः प्रत्यक् सर्वक्रियः
साक्षी सर्वान्तरः साक्षी चेता नित्योऽगुणोऽद्वयः २६ अध्यस्तनिषेध एव चेद्वात्मे-
ण क्रियते कथं तर्ह्यात्मनः स्वरूपोपलब्धिरित्यत आह उपलब्धिरिति अनुपल-
ब्ध्याऽऽदिस्वरूपत्वे प्रमाणाभावादितरत्र च साक्ष्यादिप्रयोगैर्नान्तराधर्मसूचितश्रुती-
नां प्रमाणत्वात्स्वप्रकाश [illegible] एवात्मा सदा स्वतःसिद्ध इत्यर्थः २६ श्लो- सोऽनिघोऽस राम
११८

वैशालस्यस्यानदाभोऽभिमानस्तु आत्मात्मीयद्वयं चातः स्यादहं मम गोचरः
२७ टी॰ नन्वात्मात्मीयमिति द्वयमहंममप्रत्ययगोचरत्वेन प्रसिद्धं तथा सति क
थमात्मा स्वतः सिद्ध इत्याशंक्योपाधिवशात्तथा प्रसिद्धिरित्याह सन्निधाविति
अभिमानकृदहंकारस्तस्य चिदात्मनः सर्वदा संनिधौ सत्ति तद्वा भुश्चैतन्यप्रका
शायुक्तत्वात्तदहंकारः स्यात् अतोऽहंतोरात्मात्मियं द्वयं च स्यादहं ममेति व्यवहा
रगोचर इत्यर्थः तथा च साभासांतःकरणतद्वृत्त्यविवेकादात्माहमिति ममेति
च भासमानोऽपि स्वतः सिद्ध एव स्वभावत इति भावः २७ श्लो॰ जातिकर्मादिम
त्वाद्धि तस्मिन् शब्दाः स्वहंकृति नकाश्चिद्वर्तते शब्दस्तद्भावात्स्वआत्मनि २८
36 टी॰ एवमहंप्रत्ययादेरन्योविषयत्वोपपादनेन संभाव्यो गोचरे शब्द इति श्लोकोक्तं प्र
त्यया गोचरत्वमात्मनः प्रतिपादितमिदानीं शब्दस्यापि विषयांतरं दर्शयन्स्तद
५ गोचरत्वमुपपादयति जातीति तस्मिन्नहंकृत्यहंकारे साभासे हि निश्चितं जाति
कर्मादिशब्दप्रवृत्तिनिमित्तवत्त्वाच्छब्दाः प्रवर्तंते तद्भावात्प्रवृत्तिनिमि[illegible]त्तजा

उ॰स॰टी॰ स्याद्यभावात्स्वेस्वरूपभूते आत्मनि निरुपाधिके कश्चिदपि शब्दो न प्रवर्त्तते न विष
११९ यीकुर्वन्तीत्यर्थः तत आत्मा स्वतः सिद्ध इति भावः २८ श्लो॰ आभासोपरक्ततत्रै
वशब्दाः प्रत्यग्दृशि स्थिताः लक्षयेयुर्न साक्षात्तमभिदध्युः कथंचन २९ टी॰
स्वतःसिद्धस्वरूपे आत्मनि प्रवृत्तिनिमित्तजात्याद्यभावात्कश्चिदपि शब्दो न
प्रवर्त्तते चेत्कथं तस्य वेदान्तवेद्यत्वमौपनिषदत्वमुद्घुष्यते तत्राह आभास इति अन
यत्राहंकारादावाभासश्चैतन्यप्रतिबिंबोस्य[illegible]त्त त्रैवाभासाविविक्तेन्तःक
रणादौ वाचकत्वेन स्थिता आत्मादिशब्दाः प्रत्यग्दृशि प्रत्यक्स्वरूपाभासमाने दृ
शि आत्मानं[illegible]मुहं लक्षयेयुर्लक्षणया ज्ञापयेयुर्न तु तं साक्षादभि
दध्युः कथंचन विशेषणादिप्रकारेणापीत्यर्थः अतो नौपनिषदत्वप्रसिद्धिविरोध
२९ इति भावः कथं नाभिदध्युरित्यत्र हेतुमाह न हीत्यादिना स्पष्टं ३० श्लो॰ न ह्यजा
त्यादिमान्कश्चिदर्थः शब्दैर्निरूप्यते ३० श्लो॰ आत्माभासो यथाहं स्यादात्मश
ब्दैस्तथोच्यते उल्मुकादौ यथाग्न्यर्थाः परार्थत्वान्न चांजसा ३१ टी॰ ननु लक्ष णम

यथापि यत्र शब्दस्य तात्पर्यं स एव शब्दार्थ स्तथात्मादिशब्दानामहंकाराति
रिक्ते प्रत्यगात्मन्येव वृत्तिः कथं तर्हि लोका अहंकारादावात्मशब्दं प्रयुंजते त्यपेक्षा
यामुपचारादित्ति सिद्धांतमाह आत्माभास इति श्लोकेन अहं स्वदेहंकारो वस्तु
तो नात्माप्यात्माभासः आत्मवत्स्वप्रत्ययालंबनो भासते यथा तथात्मा
३४ दिशब्दैरपि यथा प्रतिभासमुच्यते वस्तुगत्या तु शब्दप्रत्यययोः शुद्ध एवात्म
नि पर्यवसानं यथा अन्यथा शब्दाद्दहत्यादय उल्मुके दहति अयो दहतीत्युल्मु
कादौ प्रयुज्यमाना अंजसा तत्स्यादुल्मुकादौ न च पर्यवस्यंति तेषां दाहाद्या
श्रयत्वानुपपत्तेर्दहत्यादिशब्दानां परार्थत्वात्तदभिव्यक्त्यन्यार्थत्वात्तेनाग्नावे
व पर्यवस्यंति तथाहंकारस्यात्माभिव्यक्त्यर्थत्वात् तस्मिन् जडे परिच्छिन्ने परा
धीने प्रकाशे आत्मादिशब्दाश्चित्सदानंदानंतार्थो अनुपपद्यमाना विचा
र्यमाणे शुद्ध एव पर्यवस्यंतीति सर्वमुपपन्नमित्यर्थः ३१ श्लोके मुखादन्यो
मुखाभासो यथादर्शानुकारतः आभासान्मुखमप्येवमादर्शानुवर्तनात् ॥ ३२

-स-टी- आभासो यत्रेति श्लोके सिद्धांतिनाभासोंगीकृतः सच भेदविषयोसावि
१२१ शिष्टतया भासमानः परमार्थो वाऽपरमार्थो वा प्रतिवादिविप्रतिपत्यासंश
येन परमार्थ इति स्वसिद्धांतं वक्तुं दृष्टांतमाह मुखादन्य इति यथा मुखाभासो
मुखप्रतिबिंबं आदर्शानुकारत आदर्शाभावाभावयोरनुकारादादर्शान्व
यव्यतिरेकानुविधायित्वादितियावत् मुखाद्ग्रीवास्थादनागमापायेतयाऽ
स्थितादन्यो न पुनः स्वरूपेणेति योऽयं तेथासति बिंबचेष्टया विनापि प्रतिबिंब
चेष्टेत्यर्थः आभासांतं मुखमप्येनमन्यदेव कुत आदर्शानुवर्तनादादर्शोप
रपेस सत्तास्फुरणयोगादित्यर्थः तथा च ग्रीवास्थस्यैव मुखस्यादर्शे प्रति
बिंबितस्यादर्शस्थतावैशिष्ट्येन भासमानत्वमेवाभासत्वं तत्त्वेन सत्यं मुखः
वियुक्तादर्शोत्थितेऽ निरीक्ष्यमाणे वा तस्मिन्नदर्शनात् नाप्यसदपरोक्षप्रतिभा
सात्तस्मादनिर्वचनीय एवाभासस्तस्माच्चान्यं मुखमिति भावः ३२ श्लोः अहः तं
कुतस्त्यमनिभासो मुखाभासः विशिष्यते मुखवास्थितः आभासो विविक्तोतोत राम

थैवस्व ३३ टी॰ दार्ष्टांतिकमाह अहंस्वतीति अहंस्वत्यस्याहंकारे आत्मः
निर्भासश्चेतनावत्त्वावभासो मुखाभासवन्मुखान्मुखप्रतिबिंबवत्कुद्दा
त्मनोभिन्न इष्यते आत्मानुद्ध अभासादन्यस्मान्नोद्भूतः प्रतिबिंबात्मु
व खादित्यर्थः मुखस्य मुखाभासस्यादर्शस्य चाभासाश्रयस्य प्रतीतितो भे
देपि वस्तुतोभेदाभाववदात्मात्माभासतदाश्रयांतःकरणादीनां प्रतिभा
सतोभेदेपि वस्तुतोनात्मातिरिक्तं किंचिदस्तीति न परमार्थो भेद इत्यभिप्रे
त्याह अविविक्तौ तथैव चेति तावात्मात्माभासौ तथैव मुखमुखाभासावि व
वस्तुतो विविक्तौ परमार्थभेदरहितावित्यर्थः चकारादाभासाश्रयांतःक
38 रणं च न तद्विविक्तमिति योज्यं ३३ श्लो॰ संसारी च स इत्येकआभासोयस्त्व
हंस्वतीति वस्तुच्छायास्मृतेरन्यन्माधुर्यादिचकारणं ३४ एवंचिन्मात्रतंत्रा
नाद्यविद्यायांतत्कार्ये चाहंकारादौ प्रतिबिंबितं तदेव चिदात्मस्वरूपमुपा
धिस्थतावैशिष्ट्याध्यासवशात्संसारीति स्वमतमुक्त्वा तद्दृढीकरणायेक

उ-स-टी- देशिमतं दूषयितुमुत्थापयति संसारीति यस्त्वहंकृत्याभासोस्माभिः
१२१ पृथगुक्तः स एव संसारीत्येके मन्यंत इत्यर्थः नन्वाभासस्यावस्तुत्वात्क
थं तस्य बंधमोक्षभागितया संसारित्वमित्याशंक्याभासशब्देन च्छा
याया अभिप्रेतत्वात्तस्याश्च वस्तुत्वान्नानुपपत्तिरित्यभिप्रेत्याह वस्तु
छायेति छायावस्तु परमार्थानाक्रमेत्कामतः छायागुर्वादीनामिति स्मृ
तेरिति योजना तथाच याज्ञवल्क्यः देवर्त्विक्स्नातकाचार्यराज्ञां छायां
परस्त्रियः नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनादिकमिति नकैवं स्मृतिव व
चनादेव छायाया वस्तुत्वागमोस्त्वन्यत्र कारणं माधुर्यादि छायायामासी
नस्य सुखे माधुर्योपलब्धेः शैत्योपलब्धेश्चेत्यर्थः २४ श्लो· ह्येकदेशोवि
कारो वा तदाभासाश्रयः परे अहंकर्तैव संसारी स्वतंत्र इति केचन २५
टी- पुनरेकदेशिमतत्रयमाह ह्येकदेश इति ह्यस्य चित्सदानंदपरमात्मन
एकदेशः संसारी ममैवांशो जीवलोके जीवभूतः सनातन इति स्मृतेरि राम
१२१

यथैके अग्निविस्फुलिंगदृष्टांतेन सर्व एत आत्मनोव्युच्चरंतीति श्रुतेः परमात्मनो विकारः संसारीत्यपरे परेतु तदाभासाश्रयश्चिदात्माभासविशिष्टोहंकार एव संसारीति मनोदिशां दिशांपतिर्वेति श्रुतेरित्याहुरित्यर्थः भाट्टादिमतमाह अहंकर्तेति स्वतंत्रो न परमात्मांशाऽदिरूप इत्यर्थः ३५ श्लो० अहंकारादिसंतानः संसारी नान्वयी पृथक् इत्येवं सौगता आहुस्तत्र न्यायो विचार्यतां ३६ टी० बौद्धमतमाह अहंकारादीति संतानोऽविरलोदयत्तया विच्छिन्नानि क्षणिकविज्ञानान्येवात्मा संसारी न तु ततः पृथगन्वय्येको विज्ञातोऽस्ति विनाशदृष्टांतो सौगता आहुरित्यर्थः एवमुक्तेषु वस्तुविषयत्वाद्विरोधाच्च विकल्पसमुच्चययोरसंभवादन्यतमस्यैवोक्तस्य निरुपादेयत्वमथवास्मदुक्तस्य ब्रह्मैवाविद्ययाहंकारादिगताभासाविवेकात्संसारी त्येतस्येति निर्धारयो न्यायो विचार्यतामित्याह तत्रेति प्रासंगिकी संसारिचिंता हि 39 त्वाभक्ततमाभासनिरूपणं प्रतिज्ञातमिति संसारिणामिति अद्वैतसंसारिणां कथा न चाल्लां प्रकृतं त्वधुनोच्यते ३६ श्लो० मुखाभासोय आदर्शेधर्मो नान्यतरस्य सः

पक्षेषु

उ-स-टी- द्वयोरेकस्य चेद्धर्मो वियुक्तेऽन्यतरे भवेत् ३७ टी- [illegible] प्रकृतमाभासमेव निरू
१२२ पयन्नादौ मुखाभासदृष्टान्तत्वेन परमार्थमुक्तं विशदयति मुखाभास इति
योयमादर्शे मुखाभासो दृश्यते स किं मुखादर्शयोरन्यतरस्य यस्य कस्यचि
द्धर्मः किं वा मुखस्यैव धर्मः अथवा द्वयोरविधर्मो वस्त्वन्तरं वा किंचिदिति
स विकल्प्याद्यं निराकरोति धर्मो नान्यतरस्य इति एतदेव सूचयति द्वयोरिति
द्वयोर्मध्ये एकस्यान्यतरस्य चेदाभासो धर्मः स्यात्तदा वियुक्तेऽन्यतरे सति दर्पणवि
युक्ते मुखे तद्वत् रूपादिवदादर्शगोचरो भवेत् मुखवियुक्ते वादर्शे दर्पणे दृश्यो
स भवेन्न चैवमस्त्यतो नान्यतरस्य धर्म इत्यर्थः ३७ श्लो- मुखेन व्यपदेशात्स मुख
स्यैवेति चेन्न मतं नादर्शानुविधानाच्च मुखे सत्यविभावतः ३८ टी- कल्पान्तर
मुत्थापयति मुखेनेति दूषयति नेति यद्यपि मुखाभास इति मुखेन [illegible]पदिश्यते ०व्य
तथापि न मुखधर्म आभासः आदर्शानुविधानात् मुखैकधर्मत्वेतरयोगात् किं
च सत्यपि मुखे दर्पणवियुक्ते विभावनोऽदर्शनादित्यर्थः ३८ श्लो- द्वयोरेव चेति चेत् राम

अद्वयोरेवाप्यदर्शनात् अदृश्यस्य सतो दृष्टिः स्याद्राहोश्चंद्रसूर्ययोः ३९ टी॰
तृतीयं कुस्यमनूद्य प्रत्याह द्वयोरेवेति चेदिति द्वयोरप्यदर्शनादिति संबंधः नहिमु
खादर्शयोर्वियुक्तयोराभासो दृश्यते नापि संयुक्तयोरयं धर्मो यथाकथंचन संयु
क्तयोरपि तद्दर्शनप्रसंगात् तथा दृश्यते तस्मादद्वयोर्द्धर्म इत्यर्थः तर्ह्युक्तपर
मार्थवस्त्वंतरमेवाभास इति चतुर्थपक्षं दृष्टांतेन शंकते अदृश्येति सतो विद्यमा
नस्यैव सर्वैः करणैरदृश्यस्य राहोश्चंद्रे सूर्ये चोपाधौ करादिवत् दृष्टिर्दर्शनं यथा तथा
मुखाभासस्यापि वस्तुभूतस्य सतो मुखे सन्मुखवद्दर्पणोपाधौ दर्शनं स्यादित्य
र्थः ३९ श्लो॰ राहोः प्रागेव वस्तुत्वं सिद्धं शास्त्रप्रमाणतः छायापक्षे त्ववस्तुत्वं तऽ
40 स्यस्यापूर्वयुक्तितः ४० टी॰ वैषम्येण दूषयति राहोरिति चंद्राद्युपरागात्प्रागेव
ज्योतिःशास्त्रप्रमाणतो [illegible] पुराणादिशास्त्रप्रमाणतो वा राहोः सैंहिकेयस्य व
स्तुत्वं सिद्धं निश्चितं नेह तथा निश्चायकं प्रमाणमस्तीति शेषः नहि मुखदर्पणयोः ७
संबंधात्पूर्वमूर्ध्वं वा तद्व्यतिरिक्तवस्तुत्वं मुखाभासस्य केनचित्प्रमाणेन क्वापि संभ

-स-टी- वतीत्यर्थः राहोर्वस्तुत्वमंगीकृत्य दार्ष्टांतिका नजुखणत्वमुक्त मिदानीं तस्यापि नास्ति
१२२ वस्तुत्वमित्याभासस्य वस्तुत्वेनारोपं दृष्टांतइत्याह छायाध्रक्षेत्विति भूम्यादिच्छा
यारासहु इति केषांचित्पक्षः तस्मिंछायापक्षे तुतस्यराहोर्वस्तुत्वं स्यात् मुखाभा
सोयआदर्शेंद्रियादे पूर्वोक्तयुक्तितोयुक्ति संचारादित्यर्थः ४० श्लो- छायाक्रां
तेर्निषेधोयंनतुवस्तुत्वसाधकः नह्यर्थांतरनिष्ठं सद्वाक्यमर्थांतरं वदेत् ४१
टी- वस्तुछायास्मृतेरित्यत्र यच्छायाया वस्तुत्वे स्मृतिप्रमाणमित्युक्तं तत्राह छा
याक्रांतेरिति नात्वेत्यत्र छायायाइत्तिशेषः नतुछायालंघनप्रतिषेधपरम्
पिवचनंतस्याः वस्तुत्वमपिवोधयिष्यतीतिचेत् तत्रवक्तव्यं साक्षाद्वेत्तार्थादि
तिनाद्यइत्याह नहीति एकस्यवाक्यस्योभयार्थत्वेवाक्यभेदप्रसंगादित्यर्थः नद्वि
तीयोनिषेधस्यप्राप्तिमात्रसापेक्षत्वान्निषेध्यविषयारे वस्तुत्वाभावेपिनिषेधानु
पपत्तिरित्यत्र नियामकाभावादितिद्रष्टव्यं ४१ श्लो- माधुर्यादिचयत्कार्यमुष्णं
द्रव्याद्युसेवनात् छायायानत्वदृष्टत्वात्पामेवचदर्शनात् ४२ टी- यदप्युक्तं राम
१२२

माधुर्यादिकार्यदर्शनार्थक्रियाकारित्वेन छायायाः वस्तुत्वमिति तदप्यन्य
थासिद्धमित्याह माधुर्यादीति छायायामुपविष्टस्य यन्माधुर्यादिकार्यं दृश्य
ते तदुष्णमध्याह्नसेवनान्निमित्तान्न तु छायाया हेतुभूतायास्तन्माधुर्यादिका
र्यं कुतो हि उष्णतप्ततप्यमानशिलाकूटछायायां माधुर्यादिरदर्शनादभावे च दर्श
नादयं धर्मस्तात्त्वे वाव्यभिचारादतः छायायामुपविष्टस्य निरस्ततापसंसर्गस्य
स्वाभाविकस्योदकमाधुर्याभिव्यक्तौ छायामधुरेति विभ्रम इत्यर्थः ४२
श्लो॰ आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा गम्यन्ते शास्त्रयुक्तिभ्या
माभासासत्त्वमेव च ४२ टी॰ तदेवं यथा मुखं तदाभासस्तदाश्रयश्चेत्येतत्त्रयो
व्यवहारदृष्ट्या विभक्ता अवभासन्ते न परमार्थदृष्ट्या तथात्मा तदाभासस्तदा
श्रयश्चेत्यर्थत्रयं मिथो विलक्षणं गम्यते व्यवहारदृष्ट्येति दार्ष्टान्तिकमाह आ
त्माभासाश्रयाश्चैवमिति आत्मा स्वपरलक्ष्यश्चिदा [illegible] तु तस्यानाद्यवि
द्यातत्कार्यप्रतिबिंबिततया तदुपाधिस्वच्छत्वेऽपि छायं जीवत्वमाभासेऽवि

उ·स·टी· द्यातत्कार्योपाधिराश्रयइतित्वंपदार्थः शास्त्रयुक्तिभ्यामिति रूपंरूपंप्र
१२९ तिरूपोबभूवइंद्रोमायाभिःपुरुरूपईयते अनीशयाशोचतिमुह्यमानइत्यादि
श्रुतेरेकोवशीसर्वभूतांतरात्माएकंरूपंबहुधायःकरोतीत्यादिश्रुतेश्चतथा
बुद्ध्यादेर्विषयांतस्यागमापायिनोदृश्यस्यनित्यसिद्धसाक्ष्यात्मनिअध्यास
व्यतिरेकेणस्फुरणसत्तयोरनुपपत्तेरित्यादियुक्तेश्चप्रत्यगात्मनएकस्यैवस
त्वमाभासादेरसत्वंपरमार्थसत्ताभावश्चगम्यतेनिश्चीयतेइत्यर्थः ४३ श्लो·
नदृशेरविकारित्वादाभासस्याप्यवस्तुतः नाचितित्वादहंकर्तुःकस्यसंसारिताभ
वेत् ४४ टी· नन्वेवंसतित्वन्मतेसंसारमोक्षयोराश्रयाभावादनुपपत्तिरेवनत्वा
त्मातदाभासतदाश्रयाणामन्यतमस्यमिलितानांवासंसाराद्याश्रयत्वंघटत
इतिशंकते नदृशेरिति संसारोनामज्ञातृत्वकर्तृत्वभोक्तृत्वादिलक्षणोविका
ररूपोपचयलक्षणात्यंतिकापचयश्चमोक्षस्तथाचताभ्यांक्रमेणसंबध्यमानो
विकारीस्यान्नतत्वंदृशेश्चैतन्यैकरसस्यात्मनसंसारिताभवेदितिसंबंधः तत्रदृ राम
१२९

रविकारित्वादित्तिकूटस्थत्वादिसधः तथाभासस्यान संसारिताभवेदिति पूर्वेन कारमादायान्वयः तत्र हेतु

तोरवस्तुत इति पूर्वोक्तयुक्त्यातस्यावस्तुत्वनिश्चयाद... वस्तुनः शून्यस्य न कोप्युः
त्तिन्यायसंभवइत्यर्थः अहंकर्तुरहंकारस्याभासाश्रयत्वेनाभिमतस्याक्षितित्वाज्जड
त्वान्नसंसारित्ता भवेन्नहिज्ञातृत्वकर्तृत्वदुःखादिभोक्तृत्वस्वरूपस्य संसारस्य जडा
श्रयत्वसंभवो तस्त्वन्मते कस्य संसारिताभवतु मोक्षोवेति चयोन्यनकस्यापि इति
वस्तुतोनुभवविरोधइत्यभिप्रायः ४४ श्लो॰ अविद्यामात्र एवातः संसारोस्त्ववि वेकतः
कूटस्थेनात्मनानित्यमात्मत्वानात्मनीवसः ४५ टी॰ सिद्धांतीयद्येवमनिरूपिताश्रयो
तर्हि संसारमोक्षौमाभूतांपरमार्थौकस्यापीतिपरिहरति अविद्येति यत एवमतः संसारो
विद्यामात्र एव भ्रांतीमात्र एवस्वप्नवद्वस्तु अविवेकत आत्मस्वरूपाविवेकात्संसा
र आत्मनीवात्मधर्मइवावभासत इतियोजना अवस्तुभूतस्यात्मन्यपरोक्षतया
42 स इतिप्रतिभासेनिमित्तमाह कूटस्थेनेति तत्राध्यस्तत्वात्तत्सत्तयासत्तावानि
त्यर्थः नित्यमित्यन्याधीनात्मवत्तस्तत्राध्यस्ततांसूचयति ४५ श्लो॰ रज्जुसर्पोयथा
रज्ज्वासात्मकः प्राग्विवेकतः अवस्तुसन्नपिद्वेषकूटस्थेनात्मनात्तथा ४६ टी॰

-स·टी· आत्मसत्तया सत्तावानात्मधर्मद्दव भासते संसार इत्येतद्दृष्टान्तेन स्पष्टयति रज्जुस
१२५ र्प इति स्पष्टं ४६ श्लो· आत्माभासाश्रयश्चात्मा प्रत्ययैः स्वैर्विकारवान् सुखी दुःखी
च संसारी नित्य एवेति केचन ४७ टी· मतान्तरमाश्रित्य कल्पनालाघवेन शंकते आ
त्माभासाश्रय इति चकार एवकारार्थः आत्मैवात्माभासाश्रयः आत्माभासस्याभिमत
स्य जीवत्वस्याश्रयो ततः स एव स्वैः स्वधर्मभूतैः प्रत्ययैर्विकारवान् सुखी दुःखी चेत्येवं सं
सारी भवति तथापि नित्य एव तरंगादिभिर्विक्रियमाणस्यापि समुद्रस्य स्थैर्यदर्शनात् ततः
आत्माभासतदाश्रयात्मना भेदकल्पना तदविवेककल्पना तद्द्वारात्मनि संसारकल्पना
च गुर्वी आत्मैव संसारीति कल्पना लघीयसीति केचन मन्यन्त इत्यर्थः ४७ श्लोक आत्मा
भासापरिज्ञानाद्याथात्म्येन विमोहिताः अहंकर्तारमात्मेति मन्यन्ते ते निरागमाः ४८ टी· उ
क्तं पुरस्तादस्माभिः संभाव्यो गोचरे शब्द इत्यत्रात्मनि संसारित्वग्राहकं प्रमाणं नास्तीति तन्न
विस्मर्तव्यं त्वयेत्यभिप्रेत्योत्प्रेक्षामात्रमूलैवैषा कल्पना न प्रमाणमूलेति परिहरति आत्मा
भासापरिज्ञानादिति आत्मा परमार्थः कूटस्थनित्य आ[illegible] भासस्तच्छायारूपो यत्र संक्रां

राम

तोमिथ्याभूतइत्यात्माभासयोर्यथात्म्येनापरिज्ञानान्मोहितांसंतोहंकर्तारिंसाभासांतःक
रणमेवात्मेतितेमन्यंतेयतोनिरागमाः आगमरहस्यपरिचयशून्याइत्यर्थः निष्कलं
निष्क्रियंशांतंनिरवद्यंनिरंजनं साक्षीचेताकेवलोनिर्गुणश्च कृत्स्नःप्रज्ञाघनएवात्रायंपु
रुषःस्वयंज्योतिरित्यादिनित्यशुद्धत्वादिपरश्रुतिसंदर्भे तथाऽनीशयाशोचतिमुह्य
मानः अविद्यायामंतरे वर्तमानाअनृतेनहिप्रत्यूढाइत्यादिश्रुतिसंदर्भंचात्मनआ
त्य विद्यकसंसारित्वानुवादपरंतेनपश्यंतेतःस्वोत्प्रेक्षयायत्किंचिदेववदंतीत्यभिप्रायः ४८
श्लो॰ संसारोवस्तुसंस्तेषांकर्तृभोक्तृत्वलक्षणः आत्माभासाश्रयाज्ञानात्संसरंत्यवि
वेकतः ४९ टी॰ मोक्षोप्येषांदुर्लभइत्याह संसारइति तेषांमतेसंसारोवस्तुसन् परमा
र्थसन् भवेत्तथाचनासतोविद्यतेभावोनाभावोविद्यतेसतःइतिनियमस्मृतेरविनाशीसं
५३ सारइतितेषांमतेमोक्षासिद्धिरित्यर्थः यदिमोक्षाप्राप्तिभयात्संसारस्यावस्तुत्वं तेपि
मन्येरंस्तर्ह्यस्मदुक्तप्रकारएवसइत्यनुजानाति आत्माभासाश्रयाज्ञानादिति आ
त्मादित्रयाणांतत्त्वाज्ञानादविवेकतोभेदाग्रहात्संसरंतीतियोजना ५० श्लो॰ चैतन्याभास

उ.स.टी. तत्बुद्ध्यात्मनस्तत्स्वरूपता साचैतं ज्ञानशब्देश्च वेदः शास्तीतियुज्यते ५० टी. परबुद्धेमोक्षहा
१२६ निरोषमुक्तोस्वपक्षेत्वाभासाभ्युपगमेत्ताभवि शेषमाह चैत. बुद्धेरंतुः करणस्य चैतन्याभासः
ताआत्मनश्चैतन्यस्वरूपताचचेत्स्यात्भवेत्तदावेदस्तमोत्मानंज्ञानशब्दे ज्ञानसत्यानंतानंदश
रि ब्दोभिः शब्देः शास्ति प्रतिपादयतीतियुज्यतेघटतेइत्यक्षरार्थः अयंभावः स्वप्रकाशस्वभावं
वस्तुयत्रप्रतिबिंबतेतत्रप्रकाशाभासोदयहेतुर्भवतियथाजले प्रतिबिंबितः सविता तथाबु द
द्धौप्रतिबिंबितंचैतन्यंतत्रचित्प्रकाशोदयहेतुर्भवतिततः साभासायांबुद्धौगृहीतसंबंधेश
पा ज्ञानादिशब्दैर्वेद आत्मानंलक्षणया बोधयतीतिसंगच्छतेन्यथानिर्धर्मके आत्मनिशब्दश
ध्ये प्रवृत्त्यनुपपत्तेर्वेदांतवेद्यतातस्यनसिद्ध्येत्प्रमाणांतरंचतत्रकमतइतिअसिद्धिरेवात्मनः न
स्यात्तदित्याभासाभ्युपगमो वेदश्रुतिस्मृतिन्यायविद्भिः कर्त्तव्यइति ५० श्लो. प्रकृतिप्र
त्ययार्थयोर्भिन्नावेकाश्रयोयथा करोतिगच्छतीत्यादौदृष्टो लोकप्रसिद्धितः ५१ टी.
यद्यप्येवमाभासाभ्युपगमेवेदप्रवृत्तिरात्मन्युपपद्यते तथाप्यस्मिन्ज्ञानात्यादिशब्दा
नप्रवर्तेरन्इतिव्यवहारासिद्धिः प्रसज्येतेतिशंकतेप्रकृतीति अथवाज्ञानशब्दोप्युता राम

द्यमानआत्मनिमुख्यावृत्तिंलभतएव अतःकथंसाभासबुद्धिवाच्यकःसनुसआत्मनि
लक्षणयावर्त्तिष्यतइतिकल्प्यतइतिवाशंकते प्रकृतीति प्रकृत्यर्थः क्रियाप्रत्यया
र्थः कर्तृत्वंताउभौस्वरूपतोभिन्नावेकस्मिन्नाश्रयेस्थितौकरोतिगच्छतीत्यादौलोके
दृष्टौयथातथालोकप्रसिद्धितएवजानातिकरोतीत्यादौरप्यात्मैकाश्रयत्वंयुक्तमि
त्यर्थः ५१ श्लो· नानयोर्द्व्याश्रयत्वंचलोकेदृष्टंस्मृतौतथा जानात्यर्थेषुकोहेतु
र्द्व्याश्रयत्वेनिगद्यतां ५२ टी· यथैकाश्रयत्वमनयोर्दृष्टंतथाभिन्नाश्रयत्वमपिक्वचि
त्किंनस्यादित्यतआह नानयोरिति अनयोःप्रकृतिप्रत्यययोःद्व्याश्रयत्वंनलोकप्रयोगे
षुदृष्टंतथास्मृतौ व्याकरणरूपायामपिनदृष्टमतोजानात्यर्थेषुद्व्याश्रयत्वेआत्माभास्य
यार्थाश्रयत्वंबुद्धिःप्रकृत्यर्थाश्रयइतिद्व्याश्रयत्वाभ्युपगमेकोहेतुःसनिगद्यतामित्यर्थः
44 ५२ श्लो· आत्माभासस्तुतिङ्वाच्योधात्वर्थश्चधियःक्रिया उभयंचाविवेकेनजानातीत्यु
च्यतेमृषा ५२ टी· प्रकृतिप्रत्यययोरेकाश्रयत्वमा[illegible]त्रमसमन्मतेनसंगच्छतइत्युच्यते
किंवापरमार्थतस्तयोरेकाश्रयत्वंतत्रनेत्याहसिद्धांती आत्माभासइतितुशब्दःशं ऽ

-स-टी-कानिषेधार्थः आत्माभासोबुद्धिगतस्तिङ्वाच्यः प्रत्ययवाच्यः धियोबुद्धेः क्रियावृत्तिरुपाधा
१२८ त्वर्थः प्रकृत्यर्थः तथाचात्माभासोबुद्धिश्चेत्युभयं तयोरविवेकेनपरमार्थात्माविवेकेनमृषैव
जानातीत्युच्यते तथाचात्माभासव्याप्तक्रियावत् बुध्ये ... ध्यासादात्माजानातीत्येकाश्रय
त्वावभासः सप्रकृतिप्रत्यययोरिहापिनानुपपन्नइत्यर्थः ५३ श्लो· नबुद्धेरवबोधोस्ति
नात्मनोविद्यतेक्रिया अतोनान्यतरस्यापिजानातीतिवयुज्यते ५४ टी· द्वितीयंप्रत्या
ह नबुद्धेरिति सम्यग्विचार्यमाणेक्रियावत्याबुद्धेरवबोधोस्वकारोनास्तिनाप्यात्मनो
वबोधस्वभावस्यक्रियाविद्यतेतोनान्यतरस्यापिजानात्यवगच्छतीतिनिर्देशोयुज्यते त
थाचप्रतीतिमात्रशरणेरारोपिततदैक्यविषयत्वंजानात्या ... देराश्रयणीयमितिनलो
कव्यवहारविरोधः स्मृतिविरोधोवाभवतीत्यर्थः ५४ श्लो· नाप्यतोभावशब्देनङ्घ्रि
रित्यपियुज्यते नह्यात्माविक्रियामात्रोनित्यआत्मेतिशासनात् ५५ टी· यथाजाना
तीतिङइतिकर्तृत्वस्याबुध्यात्मनोरेकैकस्मिंजानात्यर्थानुपपत्तिर्नोपमिलितयोस्तदुप
पत्तिः परमार्थतोजडाजडयोरैक्यायोगात् नाप्यन्यतरस्मिन्मिलितान्यतरास्मिन्नुभ राम

सुर

याश्रयतेति घटते ध्यासव्यतिरेकेण संनिधेरनिरूपणात् तथा ज्ञप्तिर्ज्ञानमिति भावव्युत
त्यापि ज्ञानशब्दप्रयोग आत्मनि न घटत इत्याह नाप्यर्थं भावशब्देन धात्वर्थसामान्यवच तइति
नेन ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्यापि ज्ञानशब्दप्रयोग आत्मनि नयुज्यते त इत्युक्तहेतुं व्यन
क्ति नहीति क्रियामात्रत्वे पारतंत्र्येणात्मनो नित्यत्वप्रसंगस्तच्चानिष्टं नित्य आत्मेति श्रु
तिशासनादित्यर्थः ५५ श्लो॰ न बुद्धेर्बुद्धिवाच्यत्वं करणं न ह्यकर्तृकं नापि ज्ञायत इत्येवं
कर्मशब्देन निरूप्यते ५६ टी॰ यथा जानातीति ज्ञ इति कर्तृव्युत्पत्त्या ज्ञप्तिर्ज्ञानमिति भा
वव्युत्पत्त्या चात्मनि ज्ञानशब्दानुपपत्तिस्तथा ज्ञायतेने॰॰ नेति करणव्युत्पत्त्या ज्ञायत इति
ज्ञानमिति कर्मव्युत्पत्त्या चात्मनि ज्ञानशब्दप्रवृत्तिर्नयुज्यत इत्याह नबुद्धेरिति बुध्यते
अनयेति बुद्धिरिति व्युत्पत्त्या बुद्धिशब्दवाच्यत्वं बुद्धेरंतःकरणस्य स्यान्नात्मन इति यो
45 जना तत्र हेतुः करणमिति करणव्युत्पत्तिपक्षे बुद्धिशब्दवाच्यस्यात्मनः करणत्वापऽ
त्तौ कर्त्रंतराभावादकर्तृकं करणं स्यान्न हि करणमकर्तृकं क्वचिद्दृष्टमित्यर्थः तथा ज्ञाय
त इति ज्ञानमिति कर्मशब्देनाप्यात्मा न निरूप्यते न सम्यगुच्यते स्वस्य स्ववेद्यत्वानुप

उ·स·टी· पत्तेर्ज्ञात्रंतरस्याभावात् नकर्मव्युत्पत्तिरपीत्यर्थः ज्ञायतेस्मिन्निति ज्ञानमितिव्युत्पत्त्यं
१२८ तरमस्त्विति चेन्नत्र वक्तव्येज्ञेयाधारत्वमात्रं ज्ञानशब्देनोच्यते ज्ञानत्वे सति ज्ञेयाधार
त्वं वानाद्यः ज्ञेयघटाद्याधारभूतत्वादेरपिव्युत्पत्तियोगाज्ज्ञानशब्दाभिधेयत्वप्रसं
गान्न द्वितीयः आत्मनोज्ञातृत्वस्यनिराकृत्वादित्ययंपक्षोतिस्थूल इत्याचार्यैरुपेक्षितः
इति द्रष्टव्यं ५६ श्लो· न एषामेक एवात्मा निर्दुःखोविक्रियः सदा तेषांस्याच्छब्दवाच्यत्वंज्ञे
यत्वंचात्मनः सदा ५७ टी· एवंमुख्यार्थस्याज्ञानादि शब्दवाच्यत्वमात्मनोनोपपद्यत इ
ति प्रतिपादिते तद्वाच्येतत्तुल्यमित्याशंका पत्यानरिहराति न एषामिति एषांमते एक एवा
त्मासदानिर्दुःखादिलक्षणोभ्युपगमस्तेषामात्मनः सदाशब्दवाच्यत्वं ज्ञेयत्वं च नस्यात्पर
मार्थत इति योजना यद्वात्मनि मुख्यशब्दप्रवृत्यभावस्तु केवलव्यतिरेकमुखेनोपपादयति न ये
षामिति येषां मते एक एव यथानिर्दिष्ट आत्मा न भवति ते षां शब्दवाच्यत्वंज्ञेयत्वंचात्मनः
सदास्यादस्त्विति योजना तत्र कथं ऽपि व्युत्पत्तेः संभवान्न त्वेकात्मवादेभ्योऽपि तत्संभवइ
त्यर्थसिद्धं ५८ श्लो· यदाहं कर्तुरात्मत्वं तदा शब्दार्थमुख्यता नाशनायादिमत्वान्तु श्रुतौ
राम
१२८

तस्मात्तत्त्वमित्युच्यते ५८ टी॰ तत्त्वमसिशब्दार्थमुख्यत्वाच्च स विकार एवात्मेति शंकते यदेति
अहंकर्तेत्याद्यभिमन्यमानाकारस्यात्मत्वमेव नास्तीति परिहरति नेति यो ऽशनायापिपासे
शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं विदित्वेति श्रुतावात्मनोऽशनायाद्यतीतत्वस्या
भिधानाच्चागमादशनायादिधर्मवत्वादहंकर्तुस्तस्यात्मतानैवेति योजना अतोऽज्ञा
नादिशब्दा आत्मनि न सार्थाः प्रवर्तंत इत्याशंक्य भासत्वादेतास्मदुक्तात्तेषां सिद्धेरिति भा
वः ५८ श्लो॰ हंत तर्हि न मुख्यार्थो नापि गौणः कथं चन ज्ञानादौ त्यादिशब्दस्य गतिर्वा
च्या तथापि तु ५९ टी॰ नन्वेवमुक्तरीत्या यदज्ञानादेरात्मन्यन्यत्ववुद्ध्योर्वा मु
46 ख्यता न संभवेत्तर्हि वृत्त्यंतरेणाप्यात्मनि प्रवर्तिरनुपपन्ना न हि काप्यमुख्यं काचिद्
प्रवर्तत इति संभवतीति शंकते हंत तर्हीति चतुर्भिः स्पष्टं ५९ श्लो॰ शब्दानामय
थार्थत्वे वेदस्याप्यप्रमाणता सा च नेष्टा ततो भाष्या गतिरस्य प्रसिद्धितः ६० टी॰
मास्तु मुख्या भावा गौण्यपि तथापि किमिति गतिर्वाच्येति चेत्तत्राह शब्दानामिति
न केवलं लौकिकशब्दानामेवज्ञानादीनामप्रमाणता किंतु वेदस्याप्यपेक्षापि शब्द

पे

उ-स-टी- योजना लोकसिद्धव्युत्पत्त्य[illegible]क्षत्वाद्वेदबोधकत्वस्ये[illegible]त्यभिप्रायः सावेदस्याप्र

१२९ माणतानेष्टाचकाराद्वेदस्यैवात्मनि प्रमाणत्ताइ वाइति समुच्चीयते अतोवेदप्रा

माण्यांगीकारलोभादेव गतिर्वाच्याचेत्यर्थः तर्हि प्रसिद्धैव गतिः किमिह वक्त

गी व्यमिति सिद्धांतिनः शंकां गृह्णोति ततोग्राह्येति प्रसिद्धितद्गतिश्चेदितिशेषः ६०

श्लो- प्रसिद्धिर्मूढलोकस्य यद्ग्राह्या निरात्मता लोकायतिकसिद्धांतः सर्वाभि

ष्टः प्रसज्यते ६१ टी- [illegible]

[illegible]

तत्र वक्तव्यं प्राकृतजनप्रसिद्धा गतिराश्रीयते पाणि[illegible]ख्याभ्युक्त

प्रसिद्ध्या वा तत्राद्यमनूद्य दूषयति प्रसिद्धिर्मूढलोकस्येति प्राकृतप्रसिद्ध्यभ्युप

गमे देहात्मप्रसिद्धेरप्यभ्युपगमान्निरात्मवादस्यापत्तिरनिष्टा प्रसज्येतेत्यर्थः ६१

श्लो- अभ्युक्तप्रसिद्धिश्चेत्पूर्ववत् दुर्विवेकता गतिः श्रूयमाणे[illegible]रोयं प्रमाणं सन्न वे

राम

इत्युक्तं ६२ टी॰ द्वितीयमनुद्यप्रत्याह अभिपूर्ववदिति बुद्धेरात्मनो वा ज्ञातृत्वं दु
र्निरूपमिति प्रागुक्तदोषप्रसंगइत्यर्थः यद्येवं तर्हि आत्मनो गतिमूर्ध्यमेव ज्ञातृ
त्वं वेदोऽनुवदिष्यतीति तत्राह गतीति प्रमाणमिति हेतुगर्भं वेदविशेषणं ६२
श्लो॰ आदर्शे मुखसामान्यं मुखस्येष्टं हि मानवैः मुखस्य तत्र ज्ञातिर्बिंबो हि मुखाकार
णदृश्यते ६३ टी॰ चिदात्मन्येवौपाधिके ज्ञानात्मत्वादिशब्दप्रयोगः संभवतीत्यभिप्रे
त्य सिद्धांती दृष्टांतमाह आदर्शेति आदर्शे दृश्यमानं यन्मुखं तत्तेन सामान्यं समा
नत्वमेकत्वं मुखस्यादर्शाब्दे हि लिष्टतो मानवैरिष्टं हि प्रसिद्धमित्यक्षरार्थः आद
४५ र्शे मुखव्यक्त्यंतरोत्पादानुपपत्तिसहकृतया मदीयं मुखमिति प्रत्यभिज्ञया बिंबभू
त बिंबभावेनोपाधितो भेदावभासेऽपि मुखैक्यं मानवैरिष्यत इत्युक्तं भवति उक्तमे
५ वैकत्वं स्फुटयति मुखस्येति ६३ श्लो॰ यत्र यस्यावभासस्तु तयोरेवाविवेकतः ज्ञाना
तीति क्रियां सर्वो लोको वक्ति स्वभावतः ६४ टी॰ यथा काल्पितमुखस्य परमार्थमु
खस्य चान्योन्याविवेकान्मलिनं मे मुखमत्यैक्यमित्यादि व्यपदेशाउपाधिनिबंधनस्तु व

उ·स·टी· थाआत्मन्यपि ज्ञातृत्वादिव्यपदेश उपाधिनिबंधन इत्युपपन्नमिति दार्ष्टान्तिकमाह
१२० यत्रेति अथभासः आभासं ज्ञाति बिंबभाव इति यावत् ६४ श्लो· बुद्धेः कर्तृत्वमध्यस्य
जानातीति कृत उच्यते तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते ६५ टी· यच्छब्दाध्या
हृतमर्थस्य स्पष्टयति बुद्धेरिति बुद्ध्यात्मनोरुक्तान्योन्याध्यासे सत्यन्योन्यधर्मसंकरादात्मा
जानाति अहं जानामीति च व्यपदेशो भवतीति समुदायार्थः ६५ श्लो· स्वरूपं वात्मनो ज्ञा
नं नित्यं ज्योतिःश्रुतेर्यतः न बुद्ध्या क्रियते तस्मान्नात्मनान्येन वा सदा ६६ टी· ननु
बुद्ध्यभेरात्मनि ज्ञानमुत्पद्यते ततः कथमिदमुच्यते आत्मचैतन्यं बुद्धावध्यस्तमिति स
तत्राह स्वरूपं चेति ज्ञानमात्मनः स्वरूपं तदेवाज्योतिषां ज्योतिरात्मैवास्य ज्योति
रत्रायं पुरुषः स्वयंज्योतिः साक्षी चेता इत्यादिश्रुतेः अतश्च नित्यमेतद्यतस्तस्मान्न
बुद्ध्या ज्ञानं क्रियते आत्मना वान्येन वा चक्षुरादिना ज्ञानं सर्वदापि न क्रियते इत्य रा
र्थः ६६ श्लो· देहेहंप्रत्ययो यद्वज्जानातीति च लौकिकाः वदंति ज्ञानकर्तृत्वं तद्बुद्धे
स्तथात्मनः ६७ टी· बुद्ध्यात्मनोरन्योन्यधर्माध्यासेन व्यवहार इत्युक्तो यथैव दृष्टां राम

इत्या तमाह देहइति रूपादिमत्वेन घटादिवदहंप्रत्ययायोग्येपि देहे चेतनामुख्यस्य यथाहंमनु
ष्यः कृशस्थूलादिप्रत्यययोर्दृश्यत्वे तथा बुद्धेर्जडत्वेन ज्ञातृत्वायोग्यत्वेपि चिदाभासेव्या
प्त्या ज्ञातृत्वमारोप्य जानामीति लौकिकाः वदंति व्यवहरंति दार्ष्टान्तिकमाह तथात्मनीति
विकाररहितस्याप्यात्मनो विकारिचित्ताविवेकादिकारित्वादिव्यपदेशसिद्धिरित्यर्थः य
थास्थूलदेहेयद्यहं प्रत्ययोमनुष्योहमित्येवमादिरहंप्रत्ययायोग्येपि व्यवह्रियते सर्वैः
लौकिकाश्च शास्त्रसंस्काररहिताः देवदत्तो जानाति मनुत इति च देहस्येव ज्ञातृत्वं वदं
ति तद्वद्बुद्धेर्ज्ञानकर्तृत्वे तथात्मनो ज्ञानाश्रयत्वं विकारवत्वं च व्यवहारास्पदं भवती
त्यर्थः ६७ श्लो॰ बौद्धेत्वप्रत्ययेरेवं क्रियमाणेश्च चिदाभेः मोहिताः क्रियते ज्ञान
मित्याहुर्लौकिकाजनाः ६८ टी॰ ननु तार्किकाद्यज्ञानस्योत्पत्तिविनाशोपदर्शनतो ज्ञान
मात्मना क्रियत इत्याहुः तत्कथं नित्यं ज्ञानमात्मस्वरूपमित्युक्तमित्यत आह बौद्धे
ष्विति एवं पूर्वोक्तप्रकारेणात्मबुद्ध्योरन्योन्याध्यासाच्चिदाभेः चिच्छायापत्त्या वि
दिवभासमाने बौद्धे बुद्धिप्रभवेः क्रियमाणेः प्रत्यये वृत्तिविशेषे मोहिताः तार्किका

48

उ-स-टी- जनः ज्ञानं क्रियते जायते इत्याहुर्वदंति तेषां बुध्यात्माविवेक एवापराधो न तु ज्ञानं क्रि
१२१ यते तथा सति प्रत्ययोत्पत्ति विनाशयोरसाक्षितया सिद्धिप्रसंगादिति भावः ६८
श्लो- तस्मात् ज्ञाभासबुद्धीनाम् विवेकात्प्रवर्तिताः जानातीत्यादिशब्दाश्च प्रत्ययो
याच तत्स्मृतिः ६९ टी- यस्मादेवं विचार्यमाणे प्रमाणसिद्धकोटस्थ्य स्यात्मनोऽवि
कारित्वं प्रामाणिकं यस्माच्च ज्ञानमात्मस्वरूपत्वश्रवणान्नित्यमेवेति न केनापि क्रिय
ते तस्माच्च बुद्धिसंसर्गं विनात्मनो न ज्ञातृत्वमुपलभ्यते सुषुप्तावदर्शनात् बुद्धिश्च
नात्मनः पृथक् ज्ञातृत्वाधाकारोपलभ्यते तस्मादात्मबुद्धि तत्स्थाभासानामविवे
का यथाप्रसिद्धमेव व्यावहारिकं बुध्यात्मनोरेकत्वं गृहीत्वा जानात्यादिव्यपदेश उपप
द्यते न परमार्थतो मुख्यमन्यदालंबनमस्तीति प्रकृतमुपसंहरति तस्मादिति
जानातीत्यादिशब्दाश्च तदनंतरभावीतद्विषयः प्रत्ययश्च याच तत्संस्कारजा स्मृ
तिः सा चेति त्रयोऽर्थाः ज्ञाभासबुद्धीनामविवेकात्प्रवर्तिता इति योजना ६९ श्लो-
आदर्शानुविधायित्वं छायाया अस्य ते मुखे बुद्धिधर्मानुकारित्वं ज्ञाभासस्य तथे

ध्यते ७० टी॰ ज्ञाभासबुद्धीनामविवेकमूलः सव्यवहारो न पारमार्थिक इत्युक्तम ३
र्थदर्शतेन स्पष्टयति आदर्शेति छायायामुखाभासस्ययदादर्शानुविधायित्वंतन्मु
खेअस्यते ध्यस्यते यथेतिशेषः तथाध्यस्यस्य चिदाभासस्य बुद्धिधर्मानुकारि
त्वंज्ञे आत्मनि इष्यते ध्यस्य व्यवह्रियत इत्यर्थः ७० श्लो॰ बुद्धस्तु ग्रसयास्तस्मा
दात्माभासेन दीपिताः ग्राहका इव भासन्ते दहंती वोल्मुकादयः ७१ टी॰ यस्मादे
वं चिदाभासा विविक्ता बुद्धिस्तस्मात्तत्परिणामेषु ग्राहकत्वप्रतिभाससिद्धिरित्या
ह बुद्धेस्त्विति निगदव्याख्यातं पद्यं ७१ श्लो॰ स्वयमेवावभास्यंते ग्राहकाः
स्वयमेव च इत्येवं ग्राहकास्तित्वं प्रतिषेधंति सौगताः ७२ टी॰ एवमाभासाविवि
क्तपदार्थस्वरूपाज्ञानो यथा तार्किकाणां व्यामोहो ज्ञानं क्रियत इति तथा बौद्धाना
मपि बुद्धिव्यतिरिक्तो ग्राहको नास्तीति व्यामोह एवेत्याह स्वयमेव च प्रत्यया इति
शेषः ७२ श्लो॰ यद्येवं नान्यदस्त्यासीत्किंतद्वारणमुच्यतां भावाभावौ हि तेषांऽ
योनान्यग्राह्योस्ति यदि ७३ टी॰ एवं सत्युध्येनोक्ते नैतावता बौद्धावारयितुं शक्य
श्लो॰ अन्वयीग्राहकस्तेषामित्येतदपि तत्समं अथितत्व
स्यानुल्लंघ्य मिथ्या ग्राहकोऽस्ति ७४

ई.स.टी. तद्इति दूषयति एतदपीति एतदपि प्रत्यभिज्ञानसिद्धमपि ग्राहकरूपं तत्सम्प्रत्य
१३२ यसमञ्जसमेवेति तत्र हेतुमाह अचितित्वस्येति अयमर्थः प्रत्ययग्राहकः प्रत्य
भिज्ञासिद्धो ग्राहकः अप्रकाशः स्वप्रकाशो वा अद्यं प्रत्याह अचितित्वस्येति
अन्यस्मिन्ग्राहके सति ग्राह्यकोटिपतितत्वेन जाड्यापरिहारात् स्वयमप्यसिद्धः
वा कथं प्रत्ययानां ग्राहक इत्यर्थः अथ अन्यस्मिन् ग्राहके असति स्वतःसिद्धे सा
क्षिण्यविद्यमाने प्रत्यभिज्ञाग्राह्यस्यापि अचितित्वस्य तुल्यत्वात् ग्राहकत्वासि
द्धिरित्यर्थः द्वितीये स्वप्रकाशस्य साक्षिणो निर्विकारित्वादाभाससिद्धिरिति दूष
यं ७४ टी. श्लो. ७३ यद्येवं प्रत्ययानां ग्राहकमन्यं स्थिरमनादृत्य प्रत्ययमेव ग्रा
का ह्यग्राहकाकारं बौद्धा मन्यते तर्हि तन्मतस्यानुभवानुसारित्वादाभासानभ्युपगमे क
थं ते निराकर्तव्या इत्याशयेन स्वयूथ्यं पृच्छति यद्येवमिति ते प्रत्यया नान्यदृश्याः
अन्येन साक्षिणा नित्यसिद्धेन न ग्राह्या इति यद्येवं बौद्धा वदन्ति तन्मतवारणं किम
स्ति तदुच्यतां इत्युक्ते स्वयूथ्यः प्रत्याह भावाभावाविति तेषां प्रत्ययानां यो भावाः राम

१३२

भावोत्पत्तिविनाशौ सदा स्वतः सिद्धे न साक्षिणान्येनैं ग्राह्यो यद्यपि तथापि यस्मि
न् प्रत्ययानां भावाभावौ सोहमिति प्रत्यभिज्ञाबलात्तेषां ग्राहको नयी स्थाय्यः
त्मा सिध्यति किमाभासकल्पनयेति योजना ७३ श्लो· अध्यक्षस्य समीपे तु सि
द्धिः स्यादिति चेन्मतं नाध्यक्षेनुपकारित्वादन्यत्रापि प्रसंगतः ७५ टी· स्वप्रकाश
साक्षिण्यसति प्रत्ययानां भावाभावासिद्धिश्चेत्तर्हि साक्षिसान्निध्यमात्रेणैव तत्सि
द्धेः कृतमाभासाभ्युपगमेनेति शंकते अध्यक्षस्येति तत्र वक्तव्यं किं साक्षिसंनि
धानमात्रं प्रत्ययसिद्धिहेतुः किं वा तत्कृतविशेषयोगो पीति तत्र द्वितीयं तावत् दूषय
ति नेति निर्विकारेध्यक्षेउपकारित्वानिरूपणादित्यर्थः पाठांतरेध्यक्षे साक्ष्ये
50 हंकारादावनुपकारित्वादुपकारिपदवाच्यातिशयाजनकत्वादित्यर्थः प्रथमं दूषय
ति अन्यत्रापीति साक्षिणः पूर्णतया सर्वत्र सदा सान्निध्याविशेषात्काष्ठलोष्टादीना
मपि सिद्धिप्रसंगादित्यर्थः ७५ श्लो· अर्थो दुःखी च यः श्रोता सत्वध्यक्षोथवेतरः
अध्यक्षस्य तु दुःखित्वमर्थित्वं च न तत्तेमतं ७६ टी· एवमाभासानभ्युपगमे बोद्धारि

स.स.टी. मतसाम्यदोषपरिहारानुपपत्तिं व्युत्थापयन् प्रत्युत शास्त्रीयो बंधमोक्षव्यवहारोपि
१२२ तेषां न सिध्यतीति वक्तुं विकल्पयति अर्थीति यो दुःखित्वेन मोक्षार्थित्वेन च प्रसि
द्धो गुरूपदेशश्रोता स एवाध्यक्षो मत उत तोन्योवेति विकल्पार्थः आद्ये निर्गुणग्र २
हाध्यक्षवादिनस्तवापसिद्धांतप्रसंगइति दूषयत्यध्यक्षस्येति आत्माभासानं
गीकारवादिनस्ते द्वाराभावादविद्यातत्कार्यसंबंधासिद्धेस्तेन च विनार्थित्वाद्यसि
द्धेराभासाभ्युपगमप्रसंगइत्यर्थः ७६ श्लो॰ कर्ताध्यक्षः सदस्मीति नैव सद्ग्रहमर्ह
ति सदेवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते ७७ टी॰ द्वितीयं दूषयति कर्तेति
श्रोतुरर्थिनोध्यक्षस्यान्यत्वे पक्षे कर्ता कर्तृत्वादिधर्मको विकारी श्रोता जडवर्गपति
तत्वात् सदहमध्यक्षोस्मीति सद्ग्रहं सदात्मबद्ध निर्दिष्टब्रह्मात्मग्रहं नार्हतीति विरोधा
दित्यर्थः यद्वा सदध्यक्षो निर्विकार आत्माहमस्मीति सद्ग्रहं यथार्थबोधं नार्ह
ति न लभत इत्यर्थः श्रुतिबाधप्रसंगाच्चायं पक्षो न युक्त इत्याह सदेवेति ७७
श्लो॰ अविविच्योभयवक्ति श्रुतिश्चेत्स्याद्ग्रहस्तथा अस्मदस्तु विविच्यैव तमेवे राम

१२३

त्तिवेद्यदि प्रत्ययान्वयिनिष्टत्वमुक्तो दोषः प्रसज्यते ७८ टी० चिदाभासानभ्युपग
मपक्षे बंधमोक्षानुपपत्तिमुपपाद्य स्वपक्षे तदुपपत्तिमाह अविविच्येति उभय
मात्मानमहंकारं च द्वयमाभासद्वारेणाविवेकापन्नमविविच्य विविक्तमकृत्वाय
थाप्राप्तमर्थित्वाद्युपादाय श्रोतृत्वेन स्थितं प्रति तत्त्वमसीति श्रुतिर्वक्ति आत्मत
त्त्वमिति चेत्पक्षस्तदा तथाप्ययथा श्रुत्युक्तस्य ब्रह्मग्रहणं स्यात् इति योजना अय
मभिप्रायः अंतःकरणादौ चिदाभासोदये सति तेन हृते विकाराध्यासादविवेका
हंकार आत्मा अर्थित्वादिसंपन्नो मुमुक्षुतां प्रतिपद्यते तं तथैवाविवेकावस्थं त्व
मित्यनूद्याभासद्वारा साभासान्तःकरणसाक्षितया लक्षयित्वा तेजोबन्नादिसृ
5 गत्कारणत्वेनोपलक्षितं सच्छब्दवाच्यं ब्रह्म तदित्यनूद्य जीवेनात्मनानामरूपसं
घातानुप्रविष्टत्वेनापरोक्षमस्य कृ. आलक्षयित्वा त्वं तदसीति श्रुतिरुपदिशति
आत्मतत्त्वमिति तथा ग्रहणमुपपद्यत इति अहंकार एव श्रोता स्यान्न किमा
त्माभासाभ्युपगमेनेति सांख्यमतमनूद्य दूषयति अस्मदाद्येति प्रत्ययान्वय

स॰टी॰ हंकारः यद्दिवाक्यमस्मदः प्रत्यक्चैतन्यादहंकारं विविच्यैव त्वमेवेति प्रत्यगन्वयि

१२४ निस्तुत्वं वदेत्तदोक्तदोषः श्रुतेर्मिथ्योक्तित्वप्रसंगरूपः प्रसज्येतेत्यर्थः ७८ श्लो॰

त्वमित्यध्यस्तनिष्ठश्चेदहमध्यस्तयोः कथं संबंधो वाच्य एवात्र येन त्वमिति त्व

स्ययेत् ७९ टी॰ तर्ह्यहंकर्तृविषयोप्युपदेशोऽध्यस्ते पर्यवस्यतीत्याशंक्याः

ध्यस्ताभ्युपगमे तदपि दुर्घटमित्याह त्वमिति त्वमितिपदमहंकारवाचि सद

ध्यस्तं बोधयतिचेदहंकाराध्यस्तयोः संबंधग्रहणमंतरेण वाक्यार्थबोधानु

पपत्तेरहमध्यस्तयोः संबंधो वाच्य एवसकथमुपपद्यते येन संबंधेन त्वमिति

पदमध्यस्तं लक्षयेदित्यर्थः ७९ श्लो॰ दृष्टृदृश्यत्वसंबंधो यद्यध्यस्तेऽक्रियेकथं

हे ८० टी॰ अस्ति संबंध इत्याशंक्य परिहरति दृष्टृदृश्यत्वेति [illegible] यदि

दृष्टृदृश्यत्वसंबंधोऽभ्युपगम्यते तदापि संबंधग्रहणमनुपपन्नं अहंकारस्य

जडत्वात्संबंधग्रहणायोगादध्यस्तस्य तद्ग्रहणमिति वक्तव्यमक्रियेनिर्विकारे

ध्यस्ते कथं संबंधग्रहणकर्तृत्वमित्यर्थः ८० श्लो॰ अक्रियत्वेपि तादात्म्यमध्य

क्षस्य भवेद्यदि आत्माध्यक्षोऽहमस्मीति संबंधाग्रहणे न धीः ८२ टी॰ मास्तु संबं
धग्रहणं तथापि तादात्म्योपदेशो भविष्यतीति शंकामनूद्य दृष्टविरोधान्मैवमिति प
रिहरति अक्रियत्वेपीति यथा लोके पटस्य शौक्ल्यमिति पटशौक्ल्ययोः संबंधाग्र
२ धे॰ हणे शुक्लपट इति वाक्यात्तादात्म्यधीर्नोदेति तथा ममाध्यक्षोस्मीति संबंधाग्रहणे
सति न तादात्म्यधीः श्रुतितो जायत इत्यर्थः ८२ श्लो॰ संबंधग्रहणं शास्त्रादिति चे
न्मन्यसे न हि पूर्वोक्ताः स्युस्त्रिधा दोषा ग्रहो वा स्यान्ममेति च ८२ टी॰ एष त आत्मा
अन्तर्हृदये इति यानेष य आत्मा तर्हि हृदय एतद्ब्रह्मेति शास्त्रादस्त्यहंकाराध्यक्षयोः
५२ संबंधग्रह इति शंकामुत्थाप्य निराकरोति संबंधग्रहणमिति नहीत्युक्तं भवति
पूर्वोक्ता इति अहंकारस्य जडत्वात्संबंधग्रहीतृत्वं न घटते नाप्यध्यक्षस्य निर्वि
दो कारित्वादिति द्वैधे जडं प्रति श्रुतेर्बोधकत्वासंभव स्तृतीयो दोषः इति त्रिधा दोषाः
स्युः यदि कथंचित्संबंधग्रहणं कल्प्येत तदापि ममाध्यक्षोस्मीति संबंधग्रहणं स्यात्
न त्वहमेवाध्यक्षोस्मीति तादात्म्याध्यासानंगीकाराच्च कारान्ममाध्यक्षोस्मीत्य

उ-स-टी- पिनघटते अहंकारस्य जडत्वादित्यभ्युच्चयः ८२ श्लो- अदृशिर्दृशिरूपेण भा
१३५ तिबुद्धिर्यदा सदा प्रत्ययाश्चापि तस्यास्युस्तप्तायोविस्फुलिंगवत् ८३ टी- एवमा
त्मानात्मनोः परपक्षे संबंधासिद्धिमुक्त्वा स्वपक्षे मिथ्यातादात्म्यसंबंधइति दर्श
यति अदृशिरिति यदा अदृशिश्चेतना बुद्धिर्दृशिरूपेण सदा भातीत्यभ्युपगः
म्यते तदा तस्या बुद्धेः प्रत्ययाः वृत्तयोपि तप्तायोगोलकविस्फुलिंगानामिवात्म
त्ववत् दृशिरूपाः स्युरित्यर्थः ८३ श्लो- आभासस्तदभावश्च दृशेः सीम्नो न चान्यथा
लोकस्य युक्तितः स्यातां तद्द्वयं चेत्तथा सति ८४ टी- अस्मिन्पक्षे लौकिकवैदिक
व्यवहारसिद्धिरपि सुसंपादेत्याह आभासइति सीम्नोवधिभूताया दृशेश्चिदा
त्मनः सकाशादेव लोकस्याभासस्तदभावश्च प्रत्ययश्च तदभावश्च स्यातां युक्ति
तो युक्तेरुपपत्तेर्न चान्यथा तथा सति आभासानभ्युपगमे सति प्रत्ययभावा
भावयोः प्रत्ययग्राह्यत्वायोगान्न ततोत्यंतमेव विविक्तस्य चात्मनस्तद्ग्राहकत्वा
नुपपत्तेराभासद्वारात्तु संबंधादात्मनो बुद्धिवृत्तिभावाभावसाक्षित्वमुपपद्यते रम

बुद्धेश्चैतत् इह आत्मग्रहोहमस्मीत्युपपन्नः स्यादित्यर्थः ८४ श्लो॰ नन्वेवं दाशि संक्रांति
रयः पिंडेग्निवद्भवेत् मुखाभासवदित्येतद्दर्शितं निराकर्तुं ८५ टी॰ न मायोविस्फु
लिंगवदिति दृष्टांताभिधानात्मनोपि विकारप्राप्तिं शंकते नन्वेवमिति अयः
पिंडेग्निसंक्रांतिवद्बुद्ध्यौ दाशि संक्रांतिर्विकारो भवेदित्यर्थः परिहरति मुखाभास
वदिति तदेतद्बोधसारदर्शे मुखाभासवदिति दृष्टांत प्रबंधेन निराकृतमित्य
र्थः यथा मुखस्यादर्शे प्रतिबिंबितस्य तस्थत्वेन रूपेण मिथ्यात्वं तथा बुद्धौ प्रति
बिंबितस्य चिदात्मनो बुद्धिधर्मत्वेनावभासो मृषेति पूर्वमुक्तं सर्वमिहानुसंधेयमि
ति भावः ८५ श्लो॰ कृष्णायोरोहिताभासमित्येतद्दृष्टमुच्यते दृष्टदार्ष्टांततुल्यत्वं न
तु सर्वात्मना क्वचित् ८६ टी॰ तर्हि कथं न मायोविस्फुलिंगा इत्युक्तस्तत्र विका
रप्रसिद्धेर्दार्ष्टांतिकाननुरूपत्वादित्याशंक्य विवक्षितांशस्येहापि संभवान्नैवमित्याह
कृष्णायेति कृष्णवर्णमयोलोहिताभासं लोहितवर्णमवभासत इत्येतदेतावद्दृष्टं दृष्टां
तउच्यते जडायाबुद्धेश्चैतन्याभास इत्यर्थः सर्वांशसाम्यमनुपपन्नमित्याह दृष्ट

२

 दार्ष्टांतेति अप्रकाशायास्तनोमुखादेश्चंद्रादिदृष्टांताभावप्रसंगादिति भावः
१२६ ८६ श्लो. तथैव चेतनाभासं चित्तं चैतन्यवद्भवेत् मुखाभासोयथादर्शे आभा
सश्चोदितो मृषा ८७ टी. दृष्टांतेन विविक्षितमंशमुक्त्वा दार्ष्टांतिकेपि तथाविधमं
शं दर्शयति तथैवेति चेतनया आभासोयस्मिंस्तच्चेतनाभासं चित्तं चैतन्यवच्चे
तनमिव भवेत्स चाभासो यथा आदर्शे मुखाभासो विकृतः एवमेवेहापि दृश्यः
आभासश्चोपाधिस्थतया दृश्यमानो मृषा मिथ्येत्युदितः युक्त एवेत्यर्थः ८७ उ
श्लो. चित्तं चेतनमित्येतन्नशास्त्रयुक्तिविवर्जितं देहस्यापि प्रसंगः स्याच्चक्षुरा
देस्तथैव च ८८ टी. कस्माच्चिदाभासव्याप्तस्य चित्तस्य चेतनत्वं भासोभ्युपगम्य
त तेन स्वं इति शंका न कार्या तत्र प्रमाणन्याययोरभावादित्याह चित्तमिति उत्पत्ति
विनाशवत्तयान्यदृश्यस्यापि चित्तस्य चेतनताभावः स्यात्तदाति प्रसंगश्च दुष्प
रिहार इत्याह देहस्येति ८८ श्लो. तदप्यस्तिति चेत्तर्हि लोकायतिकसंगतेः नच
धीर्देहधीरस्मीति यथाभासो न चेतसि ८९ टी. इष्टापत्तिमाशंक्य परिहरति तदपीति राम

अवैदिकत्वप्रसंगादित्यर्थः किंचाभासानभ्युपगमे द्वाराभावादहं ब्रह्मास्मीति आ
गंतुकं वाक्यजन्यमैक्यज्ञानं न सिद्ध्येदित्याह न च धीरिति चेत्तस्यिच्चाभासेन भ
वेत्तदाह शिवं ब्रह्मास्मीति धीर्न भवेत् केवलस्य चितस्य जडत्वात् चिन्मात्रस्य च कूट
स्थत्वादित्यर्थः ८९ श्लो० सदस्मीति धियो भावे व्यर्थः स्यात्तत्त्वमस्यपि युष्मद
स्मद्विभागज्ञे स्यादर्थवदिदं वचः ९० टी० ब्रह्मास्मीति धियो भावे का क्षतिरि
त्यत आह सदस्मीति अपरिवधारणार्थः तत्त्वमसि वाक्यमैक्यग्राहकमुक्तधि
यो भावे व्यर्थमेवाप्रमाणमेव स्यादित्यर्थः अस्तु वै व्यर्थं तद्वाक्यश्रोतॄणां सर्वे
षां झटिति ब्रह्मास्मीति बुध्युत्पत्त्यदर्शनादित्याशंक्याह युष्मदस्मदिति अधिका
रिणः प्रमितिजनको वेद इति न्यायात् सम्यक् पदार्थविज्ञानवत एव वाक्यार्थ
54 बोधेऽधिकारात् आत्मानात्मविभागज्ञानवत्येव पुंसीदं वाक्यमर्थवत् सद्ब्रह्म
ति झटितीत्यर्थः ९० श्लो० ममेदं प्रत्ययोऽहं धीर्युष्मद्येव न संशयः अहमित्य
स्मदी ह्यस्यादयमस्मीति चोभयोः ९१ टी० तमेव युष्मदस्मद्विवेकं दर्शयितु

उ·स·टी· मुपक्रमते ममेदमित्यादिना इदंपुत्रादिममेतिच प्रत्ययोयुष्मदादिअनात्म
१२८ न्येवद्रष्टेतोपुत्रादिबाह्यार्थस्यदेहाध्याससंप्रयुक्तत्वेनैवास्मदर्थेनैवेता
दाह्यार्थसंबंधोप्यनात्मधर्मएवेतियुक्तमुक्तंममेतिप्रत्ययोयुष्मद्येवेति
नसंशयइति सर्वत्रानुषज्यते अहमिति प्रत्ययआभासद्वाराआत्मभूते.
ध्याऽहंकारिके स्मयात्मनिअहंकर्तरिद्रष्टुःस्यादहमित्येवोल्लेखदर्शनात् अयं
ना देहादिरस्मीतिचोभयोरात्मात्मनोः प्रत्ययइत्यर्थः ११ श्लो· अन्योन्यापेक्ष
यातेषांप्रधानगुणतेष्यते विशेषणविशेष्यत्वं तथा ग्राह्यं हियुक्तितः
१२ टी· आत्मानात्मविषयाणां प्रत्ययानां संकीर्णतया संकीर्णतयाचवि
षयानुक्त्वोक्तसिध्यर्थंतेषांगुणप्रधानभावेनविशेष्यभावोग्राह्यइत्याहअ विशिष्ट०
न्योन्येतिस्पष्टं १२ श्लो· ममेदंहृदयमप्येतन्मध्यमस्यविशेषणं धनीगोमा
न्यथातद्वद्देहोहंकर्तुरेवच १३ टी· विशेषणविशेष्यत्वंयुक्तितोग्राह्यमित्युक्त
मेवविविच्यदर्शयति ममेदंहृदयमिति मध्यमस्यपूर्वश्लोकमध्यमोक्तेदृष्टस्या

स्मदर्थस्यात्मनो विशेषणमिदं ममेति द्वयं मनुष्योऽहमिति प्रत्ययापेक्षयेत्य
र्थः तत्रोदाहरणं धनी गोमान्यश्चेति यथा धनादीदं त्वास्पदं तद्देहापेक्षया
ममत्वास्पदमहं कर्तुः सिद्धं तद्वत्स्थूलदेहोऽहं कर्तुरात्मनो बाह्य धनाद्यपेक्षयाहं त्वाऽ
स्पदतया विशेषणमेवेत्यर्थः चकारादात्मनोऽपि सोऽहं ज्ञातेत्याद्युल्लेखः स्थूलदे
हमपेक्ष्य प्रधानभूतोऽप्यहं कर्ता विशेषणमिति योज्यं १३ श्लो॰ बुध्यारूढं तदाऽ
दा सर्वं साहंकर्त्रा च साक्षिणः तस्मात्सर्वावभासोऽज्ञः किंचिदप्यस्पृशन्सदा १४
टी॰ एतत्सर्वं यदधीनसत्ताप्रकाशकं तत्रारोपितं सत्तस्य सदा विशेषणं भवदपि
तेन साक्षिणा न संस्पृष्टात्त इत्यादिषु यो निरपेक्षः सिद्धः स शुद्ध आत्मेति युष्मद
स्मद्विभागज्ञस्य भवेदेव वाक्याद्वाक्यार्थज्ञानमिति प्रमाणमेवव दोंतवाक्यमस्यामि
प्रेत्योपसंहरति बुध्यारूढमिति बुध्यारूढं बुद्धिवृत्तिक्रोडीकृतं सर्वं देहतत्संबंऽ
धि विषयजातं साक्षिणो विशेषणांगगुणभूतमिति योजना न केवलमेतावत् किं च साहं
कर्त्रा अहंकर्त्रा साभासमनसा सहितः सूक्ष्मोऽपि संघातः साक्षिणो विशेषणं तस्मिन्

55

·स·टी· १२८

ध्यस्तत्वात्तदवभास्यत्वादित्यर्थः यस्मादेवं परमार्थतः किंचिदप्यस्पृन्नात्मसदा सर्वस्या
भासद्वारावभासयतीव सर्वावभासस्तस्माज्ज्ञो ज्ञानरूप एव सदास्मीति विवेको युक्त
इत्यर्थः २४ श्लो॰ प्रतिलोममिदं सर्वं यथोक्तं लोकबुद्धितः अविवेकधियामस्ति नास्ति
सर्वं विवेकिनां २५ टी॰ एवं विवेकिनां मार्गो विपश्चितां त्वविवेकिनां क्षेमादावध्यात्मनो
विशेषणत्वप्रतीतेरित्याह प्रतिलोममिति बाह्यार्थोपहतचेतसो लोकस्य बुद्धिस्तस्याः इ
ति बाह्यार्थसत्वप्रधानां लोकबुद्धिमपेक्ष्येति यावत् तथा च बाह्यार्थं प्रधानीकृत्य यदि
दं यथोक्तं विशेषणविशेष्यादि सर्वं प्रतिलोममनात्मभूतं तदविवेकधियां विवेकज्ञान
शून्यानां द्रष्टव्यमस्ति वर्तते विवेकिनां तु द्रष्टव्यं सर्वमेतद्विशेषणादिकं दृश्यरूपं नास्ति न व
र्तते अतो विवेकिनां बुद्धिमात्मन्यवतारयितुं विशेषणविशेष्यादिप्रबंधकल्पना यथा
प्रतीति सत्तामादाय क्रियते अध्यारोपापवादन्यायेनेति भावः २५ श्लो॰ अन्वय
व्यतिरेकौ हि पदार्थस्य पदस्य च स्यादेतदहमित्यत्र युक्तिरेवावधारणे २६ टी॰ नन्व
न्वयव्यतिरेकाभ्यामेव सर्वसंसारविनिर्मुक्तात्मावगमात् किं वाक्येनेत्याशंक्याह अ

राम
१२८

न्वयव्यतिरेकौ होति पदार्थस्यान्वयव्यतिरेकौ नाम आत्मपदार्थो द्रष्टा साक्षी न क
दापि दृश्यः साक्ष्यो वा भवति तस्याखण्डप्रकाशसन्मात्रतत्त्वस्वतः सिद्धत्वाद
न्व तो नन्याश्रयत्वात्कदापि कस्यापि विशेषणमात्मा तथाय दृश्यं साक्ष्यं चाहंका
रादिविषयान्तं तदन्याधीनप्रकाशसत्ताकतयान्याश्रयं सत्सदा विशेषणभावं
न व्यभिचरति तस्मादनागमापायि दृगात्मस्वरूपं सत्यं स्त्र्यादिकं तद्विपरीतम
सत्यं रजतादिवदित्यनृतजडपरिच्छिन्नपराधीनपरागर्थव्यावृत्तः सत्यज्ञाना
नन्द आत्मेति विवेचनं पदस्यान्वयव्यतिरेकौ नामात्मा चैतन्यं प्रज्ञानं ब्रह्म स
50 दित्यादिपदानि कर्तृत्वाद्युपप्लवविधुराणि केवलस्यैवात्मनः समर्पकाणि न वि
शेषणतद्विशिष्टविषयाणि असामर्थ्यात्कर्ता भोक्ता ज्ञाता द्रष्टा श्रोता व
क्ता गन्ता हर्ता स्थूल इत्यादीनि तु न केवलपूर्णात्मविषयाणि अन्याधीन
क्रियाद्युपरागदशायामेव प्रयुज्यमानत्वादिति विवेचनं एवं पदस्य पदार्थ
स्यान्वयव्यतिरेकाविति यत्तदहमित्यत्रासमर्थविपर्ययेवधारणेयुक्तिरे

कु॰स॰टी॰ वस्थादिविवेकावधारणोपायमात्रं स्यान्नतु वाक्यार्थपदार्थैक्ये व्यापारो स्येत्यर्थः
१३९ तस्मादेतावतापि विवेकेन देहादिवैलक्षण्ये वधारितेपि कोहं तर्हीति जिज्ञासाया
अनुवृत्तेस्तत्त्वमसीति वाक्यं जिज्ञासितस्वरूपविशेषसमर्पकमवश्यमपे
क्षितव्यमेवेति भावः ९६ श्लो॰ नाहंसाक्षमहमित्यस्मिन्सुषुप्तेन्यन्मनाग
पि नवारयति दृष्टिस्वां प्रत्ययं तु निषेधति ९७ टी॰ किंचावस्थात्रयं परस्प
रंव्यभिचारि चेतन्यात्मा तु नकदापि व्यभिचारीति प्रकारांतरेणात्मानात्म
विवेकं दर्शयति नाहंसाक्षमिति अस्मिन्सुषुप्ते आत्मनि अवस्थाने वाम
नागपि ईषदप्यन्यदात्मस्वरूपातिरिक्तमहंनाहंसन्नद्रष्टवानस्मीति
परामृशन्नुजनो न स्वांस्वात्मनो दृष्टिं चैतन्यं वारयति प्रत्ययं तु पुनर्निषेध
ति प्रतीयत इति प्रत्ययः इति बुद्धयावमात् प्रमाणप्रमेयादिरूपः सर्वए
व विशेषो गृह्यते तस्मात्परस्परव्यभिचारितयास्वप्नस्वभावावस्था
भ्यो मिथ्याभूताभ्योऽव्यभिचारीचिद्रूपः साक्षी सत्य आत्मेति विवेकः सिद्ध्य ते म

१३९

त्तीत्यर्थः ९७ श्लो- स्वयंज्योतिर्नहि द्रष्टुरित्येवं संविदो ... सिता कौटस्थ्यं च त
थात्तस्याः प्रत्ययस्य तु लुप्ततां स्वयमेवाब्रवीच्छास्त्रं प्रत्ययाव गती पृथक्
९८ टी- एवमुक्तमन्वयव्यतिरेकौ शास्त्रसंमतौ न स्व बुद्ध्युत्प्रेक्षामात्रकृतौ
विति विश्वासाय शास्त्रमुदाहरति स्वयंज्योतिरिति साधेन अत्रायं पुरुषः
स्वयंज्योतिः नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्येवमादि शास्त्रं संविद्श्चेतना
या अस्तितां सद्भावं तस्याः संविदः कौटस्थ्यं निर्विकारतां च स्वयमेवाब्रवीदि
ति संबंधः तथा प्रत्ययस्य प्रमात्रादि भेदस्य तु लुप्ततामस्तितां च न तु लद्वितीयमु
स्तीत्ततोन्यद्विभक्तं मित्यादि शास्त्रं स्वयमेवाब्रवीदिति पुनरन्वयः एवं
प्रत्ययावगतौ पृथक् असंकीर्णे शास्त्रेण वविदितावित इति शेषः प्रत्ययो व्या
ख्यातः अवगतिश्चैतन्यं ९८ श्लो- एवं विज्ञातवाक्यार्थे श्रुतिलोकप्रसिद्धि
तः श्रुतिस्तत्त्वमसीत्याह श्रेतुर्मोहापनुत्तये ९९ टी- एवमेवांतरवाक्यकृतं
युष्मदस्मत् विवेकमुपपाद्य तदुक्तां विज्ञातपदार्थतत्त्वे पुरुषे महावाक्यं

57

स.टी॰ फलवद्विज्ञानं जनयतीत्याह एवमिति एवमुक्तप्रकारेण श्रुतिप्रसिद्धितो लोकप्रसि
१४० द्धितोन्वयव्यतिरेकतश्च विज्ञातावांतरवाक्यार्थे पुंसि सति महावाक्यात्मिका श्रुतिः
श्रोतुर्जिज्ञासोर्मोहापनुत्तये स्वकार्यविद्यानिरतिप्रयोजनायालं तस्मादारब्धं ब्रह्मैतम
नस्मीत्याहोपहितशास्त्रादित्यर्थः ९९ श्लो॰ ब्रह्माऽहमस्मीत्यर्थैर्यद्दृढतैर्वाक्यानुदृततमः तस्य
विष्णुत्वसंबोधेनयत्नांतरमूचिवान् १०० टी॰ वाक्यश्रवणमात्रान्मोहापोहे दृष्टांतपु
राणसिद्धमाह ब्रह्मेति शतार्थिनारामेणरेव कार्यसिद्धेर्मनुष्यावतारनाट्येन स्वमा
हात्म्याच्छादनं संकल्पपूर्वकमभूद्रघुनंदनस्य नाहं विज्ञानइति केचन कालमेतत्
ब्रह्मोपदेशमुपलभ्य निमित्तमात्रे तत्त्वोत्ससर्ज सकलैस्सन्निरेव कार्यइति हे राम त्वं
विष्णुरसि नरवरस्थणुनमात्रइत्युक्तैर्वब्रह्मादाशरथेः संकल्पमात्रकृतं तमोवि
ष्णुत्वाच्छादनरूपमपानुदत् एवकारार्थमाह तस्येति यत्नांतरं वाक्योपदेशाग्र
ति ह्यातिरिक्तमित्यर्थः १०० श्लो॰ अहंशब्दस्ययानिष्ठाज्योतिषिप्रत्यगात्मनि सैवो
क्तासदसीत्येवं फलंतत्रविमुक्तता १ टी॰ दार्ष्टांतिकमाह अहमिति एवंशब्दः प्रथ -ग्रम

यत्कृतं तदिह तमःशब्देनोच्यते नत्वीश्वरस्य संसारमोहः संभवति तदुक्तं संक्षेपशारीरके संकल्प
पूर्वक० १४०

मंयोऽन्यः यथायं दृष्टांतः एवं सदसीति वाक्ये न सानिर्धोरै व केवलं नातु सा[illegible]पिता इति योजना साकांक्षेतिलाभाह अहंशब्दस्येति प्रत्यगात्मनि परार्थेभ्यो व्यावृत्तः शोधिते आत्मनि निरुपाधिके ज्योतिषि साक्षि स्वप्रकाशस्वभावे अहं शब्दस्य या निरालक्षणया पर्यवसिता वृत्तिः सैवेत्यर्थः यद्वा दृष्टांतस्य दार्ष्टांतिकमेवं विज्ञा तवाक्यार्थ इति पूर्व श्लोक एव स्थितं द्रष्टव्यं अयं त्वन्यथोच्यते ननु दाशरथे र्भवेदेव विष्णुत्वोपदेशात् विष्णुरहमस्मीति झटिति बोधोदयस्तस्य महामहि मसंपन्नत्वात् कथमिदानींतनस्य कर्त्रादेः केवलस्य प्रत्यगभिमतमिथ्याप्रत्यये गृहगृहीतस्योपदेशमात्रादहं ब्रह्मास्मीति निर्विचिकित्सं ज्ञानं संभाव्यत इत्याशं क्य शोधितत्वं पदार्थस्य पुंसः कर्त्रादिसाक्षिण एवाहमादिशब्दलक्षितस्य ब्रह्म त्वोपदेशान्नानुपपत्तिरस्तीति परि[illegible]हरति अहं शब्दस्येति सदसीत्येवं वा क्येन सेव निष्ठेति संबंधः अन्यसमानं १ श्लो॰ श्रुतमात्रेण चेदस्यात् कार्यं तत्र भवेत्क्व वं व्यवहारादुरापीह सद्भावः स्वयमात्मनः २ टी॰ एवमवगतपदार्थत

स्तत्त्व तत्त्वं तदसीत्युपदेशमात्रादहं ब्रह्मास्मीति वाक्यार्थज्ञानोदये मात्रे सति वि

मे॰ गी॰ टी॰ अ॰ १८ ऽर्ध॰ प॰ ५८

उ·स·टी· तस्य वाक्यादेव समूलसंसारनिवृत्तिफलं ज्ञानं जायत एवेति स्थिते श्रुतेः प्रामा
१४१ ण्यसिध्यर्थं कार्यपरत्वं कल्प्यमित्याग्रहो निरर्थको विद्वदनुभवविरोधादित्यभिप्रे
त्याह श्रुतमात्रेणेति यथोक्तन्यायेन वाक्यस्य श्रुतमात्रेण चेदुक्तफलं ज्ञानेन स्या
न्न त्वेतदा कार्यं कल्प्यं क्वचमपूर्वं भवेदन्यथार्थवादादिवाक्यवत्स्वार्थे प्रामाण्यानु
पपत्तेः इह तु न तथा कल्प्यमस्ति फलस्य सर्वैरनुभवसिद्धत्वादित्यर्थः स्वयं ज्यो ८
तिर्न हि दृष्टुरिति श्लोके पूर्वमर्धश्लोकोऽधिकः स्थितः इह चायमर्धश्लोकः इति स
हगणनीयं किं च सिद्धे ब्रह्मात्मनि शास्त्रस्याप्रामाण्यं नाम विपर्यासलक्षणं
वा निष्फलत्वं वा संशयलक्षणं अनुत्पत्तिलक्षणं वेति विकल्पानुक्रमेण दूषयति
व्यवहारादित्यादिना नाद्यः अस्माद्व्यवहारादहं ब्रह्मास्मीति शास्त्रोपदेशव्यव
हारात्पुरा पूर्वमप्यात्मनः स्वयमेव सद्भावे दृष्टो बाधकाभावात्तस्माद्यथावस्थिता
त्मस्वरूपस्यैव श्रुत्या निवेदनान्न शुक्तिरूप्यज्ञानवदप्रामाण्यमित्यर्थः २ श्लो·
अज्ञानाद्याहितनिर्मुक्तौ तत्कालाज्जायते प्रमा तत्त्वमस्यादिवाक्यार्थे त्रिषु लोकेषु
राम
१४१

संशयः ३ टी· नहीती योनुभवविरोधात् इत्याह अशनायादीति तत्कालासवाक्यश्रवण
कालएवकालोयस्यासातत्कालाप्रमा अशनायाद्युपलक्षितसंसारस्यनिर्मुक्तयोनि
वृत्यर्थंजायतेविदुषांप्रत्यक्षमेवैतदित्यतोननिष्फलत्वशंकावकाशइत्यर्थः तृतीय
मप्यनुभवविरोधेननिराकरोति तत्वमसीति असंशयः संशयोनास्तीत्यर्थः ३
श्लो· प्रतिबंधविहीनत्वात्स्वयंचानुभवात्मनः जायेतैवप्रमातत्रस्वात्मन्येवनसं
शयः ४ टी· चतुर्थंप्रत्याह प्रतिबंधेति पदार्थाज्ञानंहिवाक्यार्थज्ञानोत्पत्तिप्रति
59 बंधस्तद्विहीनत्वादवगतपदार्थस्यपुंसस्तत्रतस्मिन्नेववाक्यश्रवणकालेआत्मन्ये
वप्रमाजायतेवनसंशयइतियोजना आकाशपुष्पमस्तीत्यादिवाक्यार्थवदनुभवा
योग्यार्थत्वशंकांवारयति स्वयंचेति अनुभवस्वरूपत्वात्स्वयमात्मनः प्रत्याख्या
तुमशक्यत्वादित्यर्थः अतोहुंफटादिशब्दवदनुत्पत्तिलक्षणमप्यप्रमाण्यंनास्ती
तिसिद्धं सिद्धेब्रह्मात्मनिवाक्यस्यप्रामाण्यमितिभावः ४ श्लो· किंसदेवाहम
स्मीतिकिंवान्यत्प्रतिपद्यते सदेवचेदहंशब्दः सतामुख्यार्थइष्यतां ५ टी· एवंप्र

उ॰स॰टी॰ माणस्वरूपनिरूपणेनाहं ब्रह्मास्मीति ज्ञानमुपपाद्येदानीं प्रतिपत्त्यर्थस्वभावनि
१४२ रूपणेनापि तदुपपादयितुं विकल्पयति किं सदेवेति तत्त्वमसीति वाक्यश्रवणसमनं
तरं प्रतिपत्त्यावहमस्मीति किं सदेव प्रतिपद्यते किं वान्यदिति विकल्पार्थः आद्यम
नूद्य तत्र परस्यानिष्टापत्तिरित्याह सदेव चेदिति सत्तासत्शब्दार्थेनाहंशब्दो
मुख्यार्थः इष्यतां तदा च सच्छब्दाहंशब्दयोरेकार्थपर्यवसानादैकात्म्यमेव वा
क्यार्थो न संसर्ग इत्यपरोक्षज्ञानसिद्धिरित्यर्थः ५ श्लो॰ अन्यच्चेत्सदहंग्राह प्रति
पत्तिर्मृषैव सा तस्मान्मुख्यग्रहेनास्ति वारणावगतेरिह ६ टी॰ द्वितीये दोषमा
ह अन्यचेदिति प्रत्यगात्मनोन्यच्चेत्सत्तदाहंग्राह प्रतिपत्तिरहंग्राहरूपाया प्रतिप
त्तिर्मृषैव सा भवेत् संपदादिज्ञानवत् तत्र वाक्यस्याप्रामाण्यमेव प्रसज्येतेत्यर्थः
प्रमाणप्रमेयस्वभावपर्यालोचनया वाक्यादेवापरोक्षं फलवदात्मतत्त्वविज्ञानमुत्प
द्यत इत्युपपन्नमित्युपसंहरति तस्मादिति इह महावाक्ये मुख्यग्रहे सति अवग
तेर्यथार्थानुभवस्य वारणा निवारणं नास्तीत्यर्थः ६ श्लो॰ प्रत्ययी प्रत्ययश्चैव य राम

१४२

दाभासोंतरर्थता तयोरचितिमता ब्चैतन्येकल्प्यतेफलं ७ टी॰ नन्वात्मनः कूटस्थ
त्वेनप्रतिपन्नत्वात्नुपपन्नोफलसंबंधोनोपपद्यतेइत्यस्त्यात्मग्रहेनिवारणेत्याशंक्या
ह प्रत्ययीति प्रत्ययीपरिणाम्यंतःकरणंप्रत्ययस्तत्परिणाम श्चयदाभासोथस्य
चिदात्मनआभासोयस्योस्तौथदाभासोतयोस्तदर्थताल छेषभूतताइतियावत् तः
स्मि श्चैतन्येचिदात्मनितदाभासद्वाराफलंकल्प्यतेकिंचतयोः प्रत्ययिप्रत्ययोरचे
तिमत्वाज्जडत्वादपिफलसंबंधायोगात् फलस्यात्मसंबंधःस्यादित्यर्थः ७
60 श्लोक. कूटस्थेपिफलंयोग्यंराजनीवजयादिकं तदन्यात्मत्वहेतुभ्यांक्रियायाःप्र
त्ययस्यच ८ टी॰ निर्व्यापारस्यापिफलसंबंधेदृष्टांतमाह कूटस्थइति ननुरा
जतद्भृत्ययोःस्वस्वामिभावसंबंधोस्तीतिराजनिजयादिसंबंधनिमित्तमिदत
ध्यस्तान्ध्यस्तयोस्तादृशस्यादर्शनात्कथमयंदृष्टांतः प्रकृतेसंगतःस्यादित्या
शंक्यान्नाध्यस्त्याधिष्ठानाधिष्ठेयभावःफलसंबंधहेतु...रित्याह तदिति हेतुभ्या
मित्यत्रहेतुत्वाभ्यामितिभावप्रधानंयोज्यंक्रियाहमात्मिकावृत्तिःप्रत्ययमित्यतीति

उ-स-टी- प्रत्ययइतिव्युत्पत्तेः प्रत्ययोऽन्तःकरणं स आभासमुच्यते स आभासइतिदर्शितमतो

१४६२ रतियावत् आत्मत्वं च हेतुत्वं च आत्महेत्वे तस्य फलस्य न आत्मत्वहेतुत्वे तदनात्मत्व गु

हेतुत्वे ताभ्यां तदनात्मत्वहेतुताभ्यामिति योजना तथा च क्रियाप्रत्यययोर्जडयोः फ

लस्वरूपत्वाभावात् कर्तृत्वोपादानत्वाभावाच्च तद्व्यापारानिबंधनं फलं तदधिष्ठान

एव निर्व्यापारे पि कूटस्थे योग्यमित्यस्ति दृष्टांतदार्ष्टांतिकसंगतिरित्यर्थः ८

श्लो० आदर्शस्तु यदाभासो मुखाकारस्तथैव सः यथैवं प्रत्ययादर्शो यदाभासस्त

थास्यहं ९ टी० शुद्धस्यात्मनः प्रमातृत्वं नास्तीत्यभिप्रेत्य हंविशिष्टप्रमातृकं तत्फ

लं कूटस्थे उपचर्यत इति राजदृष्टांतेनोक्तं वस्तुतस्तु चित्प्रतिबिंबस्यैव स्वोपाधि

व्यापारेण स्वात्मन्यध्यस्तेन चिद्यत्ते एव प्रमातृत्वमिति चिदात्मन एवाविकृतस्य प्रति

बिंबभावनिबंधनः फलसंबंध इति दृष्टांतमाह आदर्शस्त्विति येन मुखाकारे

ण विशिष्टतया आभासत इति यदाभासः सन्नादर्शो मुखाकारः स एव ग्रीवास्थ

एव सन्नतो न्यो यथा बिंबप्रतिबिंबयोरैक्यं लोके प्रसिद्धमित्यर्थः एवं प्रत्ययादर्शो राम

२४६

हंकारे यश्चाभासो येन चित्प्रतिबिंबेनाभास्यत इति यश्चाभासः सचित्प्रतिबिंबः
परमात्मैव न ततोन्योऽहंकारे ह्यवभासगोचरस्तथा सत्यहं ब्रह्मेति वाक्यार्थधी
घटते ध्वस्तांशापोहमात्रेण विना नात्मनः कर्मत्वमित्यर्थः ९ श्लो॰ इत्थेवं
प्रतिपत्तिः स्यात्सदस्मीति वचनान्यथा तत्त्वमित्युपदेशोपि द्वाराभावादनर्थकः
१० टी॰ अयमेव पक्ष आदरणीय इत्याह इत्थमिति एवं सति चिदाभासाभ्युपग
मे सति सदहमस्मि चकारादहं सदस्मीत्येवमाकारा प्रतिपत्तिः स्यादन्यथात्म
न एव वाहं हंकारस्यैव वा [illegible] प्रमातृत्वाभ्युपगमे इति यतो तोयमेव मार्गो निर्व
61 द्विरप्यादरणीय इति योजना एवमनभ्युपगमे न केवलं प्रतिपत्त्यनुपपत्तिरपि
तूपदेशस्याप्यनुपपत्तिरित्याह तत्त्वमिति त्वमर्थानुवादद्वारेण हि तदर्थभा
वउपदेष्टव्यस्तत्रानूद्यमानस्य चित्प्रतिबिंबाभावेन तदर्थोपदेशो निरालंबनो स्या
नर्थकः स्यादित्येतदाह द्वाराभावादिति १० श्लो॰ श्रोतुः स्यादुपदेशश्चेदर्थवत्त्वं त
था भवेत् अध्यक्षस्य न चेद्दृष्टं श्रोतृत्वं कस्य तद्भवेत् ११ टी॰ एतदेव विशदयति

 श्रोतुरिति तथा सतीत्यर्थः तच्च श्रोतृत्वमध्यक्षादन्यत्र न संभवतीत्याह अध्यक्षस्येति
 न कस्यापीत्यर्थः ११ श्लो· अध्यक्षस्य समीपे स्याद्बुद्धेरेवेति चेन्मतं नुत्तत्कृतोपकारोस्ति
कश्चिदाधिदन्नकल्प्यते १२ टी· यद्यप्यध्यक्षस्यनोपदेष्टृत्वं तथापि नवैयर्थ्यमिति शंकते
अध्यक्षस्येति तत्र बुद्धेः श्रोतृत्वं किमध्यक्षसन्निधिसत्तामात्रापेक्षमाहोस्वित्तत्कृतो
पकारापेक्षमिति विकल्प्याद्यं प्रत्याह नतेति तत्कृतः सन्निहिताध्यक्षकृतोपकारो
तिशयो बुद्धेर्नास्ति यद्वत्काष्ठादिंधनादेः संनिहितत्वात् बुद्धावतिशयो न कल्प्यते तद्वदि
त्यर्थः १२ श्लो· बुद्धौ चेत्तत्कृतः कश्चिन्नन्वेवं परिणामिता आभासे पि च को दोषः सति
श्रुत्याद्यनुग्रहे १३ टी· द्वितीयमुत्थाप्य दूषयति बुद्धौ चेदिति एवं सति आभासानभ्यु
पगमेध्यक्षस्य परिणामितानुनिश्चितं प्रसज्येतेत्यर्थः अतो रूपं रूपं प्रतिरूपो बभूव
एकधा बहुधा चैव दृश्यते जलचंद्रवत् इत्यादि श्रुतिस्मृत्यनुगृहीत आभासपक्षो निर्दु
ष्ट उपादेय इत्यभिप्रेत्याह आभासे पि चेति यद्वा अस्तु परिणामिताध्यक्षस्येति चेत्त
र्ह्याभासे पि वक्ष्यमाणसिद्धेभ्युपगम्यमाने तत्र को दोषो भविष्यतीत्याह आभासे पीति १३

श्लो· आभासेपरिणामश्चेन्नरज्ज्वादिनिभत्ववत् सर्पादेश्च तथात्वे च मादर्शे च मुखत्व
वत् १४ टी· आभासपक्षे चिदात्मनः परिणामप्रसंगाभावं वक्तुं शंकामुत्थापयति
आभासेपरिणामश्चेदिति नैवमाभासस्य मृषात्वोपपत्तेरितिपरिहारमाह नरज्ज्वा
दीति रज्ज्वज्ञानकल्पितस्यसर्पादेरज्जुनिभत्ववदिदमात्मकस्य रज्ज्वादेरिदमात्म
च कत्ववच्चिदात्माज्ञानकल्पितस्य बुध्यादेर्मृषैव चिन्निभत्वं चकारादभोक्तृस्वरूपस्या
त्मनो भोक्तृत्वाभासो मृषैवेति सूच्यते यथैवं मृषात्वं तथा पूर्वमत्वे च मादर्शे च मु
खाकारत्ववदिति दृष्टांतप्रणयनेनेत्यर्थः चकारैर्मुखस्येवात्मनो विकृतत्वमप्यवो
62 चमित्यर्थः १४ श्लो· नात्माभासत्वसिद्धिश्चेदात्मनोग्रहणात्पृथक् मुखादेश्च
पृथक्सिद्धिरिहत्वन्योन्यसंश्रयः १५ टी· अहंकर्तेरेवात्मत्वमितिमन्यमानस्यऽ
विच्चिन्निभत्वमाक्षिपति नात्मेति आत्मनः केवलस्याग्रहणादवभासनात्पृथगेवात्माभास
त्वसिद्धिश्चेन्न भवेत् आभासावभासेनैवात्माभासो भवेत्तदाद्दूहत्वास्मिन्मतेन्योन्यसंश्र
यइतियोजना दृष्टांतस्य विषमइत्याह मुखादेरिति दर्पणादिगताभासव्यतिरेकेणग्री

उ.स.टी. वास्तवत्वेन मुखस्य सदा सिद्धिरस्तीति न तत्रान्योन्यसापेक्षतेत्यर्थः १५ श्लो.
१८५ अध्यक्षस्य पृथक्सिद्धावाभासस्य तदीयता आभासस्य तदीयत्वे त्वध्य
क्षव्यतिरिक्तता १६ टी. अन्योन्याश्रयमेव स्पष्टयति अध्यक्षस्येति तथा चा
हमिति प्रतीयमानोऽहंकृत्यात्मक एव चेतन आत्मेति युक्तमित्यभिप्रायः १६
श्लो. नैवं स्वप्ने पृथक्सिद्धेः प्रत्ययस्य दृशोस्तथा रथादेस्तत्र शून्यत्वात्स्वप्रत्ययस्यात्म
नाग्रहः १७ टी. अहंकृत्यात्मकस्यान्तःकरणस्य स्वप्ने दृश्यत्वेनैव व्यवस्थितत्वा
त्तदाभासनिरपेक्ष एवात्मा तत्र सिद्ध इति नोक्तदृष्टान्तासंगतिरिति परिहरति नैवेति
य प्रत्ययस्यान्तःकरणस्य दृशो रात्मनश्च स्वप्नावस्थायां यथा मुखतत्प्रतिबिंबवत् पृथग
न्योन्यनिरपेक्षतयैव सिद्धेरित्यर्थः कुत एतदित्यपेक्षायामाह रथादेरिति न तत्र रथा
नरथयोगान्पंथानो भवन्तीत्यादिना स्वप्ने रथादिद्वयराहित्यस्य श्रूयमाणत्वात्स्वप्रत्यय
स्यैव रथाद्याकारमापन्नस्य तत्रात्मना स्वप्रकाशेनान्येन ग्रहस्तथा चात्मा प्रत्ययसंव
लनविनिर्मुक्तः स्वप्रकाशतया समान एव स्वप्ने विषयाकाराकारितप्रत्ययसाक्षी सि
द्ध इत्यर्थः १७ राम

१८५

श्लो॰ अवगत्यादिसंव्याप्तः प्रत्ययो विषयाकृतिः जायते यस्य दाकारः स बाह्यो विषयो
मतः १८ टी॰ स्वप्नपर्यालोचनया चिदात्मनः प्रत्ययादि विवेकं दर्शयित्वा जाग्रत्स्व भा
वालोचनयापि तमाह अवगत्यादिना विषयस्याकृतिरिव आकृतिर्यस्य अथवा वि
षयस्याकृतिरिवाकृतिर्यस्य विषयाकृतिरिति विग्रहः आत्मचैतन्यव्याप्ते विषयाकारप्रत्य
ये जायमाने तस्मिन् यो विषयाकारः स बाह्यो विषय इत्यर्थः १८ श्लो॰ कर्मेप्सितत
मत्वात्स तद्वान् कार्ये नियुज्यते आकारोऽयत्र चार्प्यते करणं तदिहोच्यते १९ टी॰ किंच
कर्मेति स बाह्यो विषय ईप्सिततमत्वात् कर्तुः साध्यतयोद्देश्यत्वेन ईप्सिततमत्वात्कर्म भ
वति तद्वान् स हि विषयेच्छावान् कार्ये नियुज्यते कुर्विति प्रेर्यते यत इत्यध्याहारः आकार
63 समर्पकस्य कर्मकारकत्वं तथा विषयत्वमुक्त्वा प्रत्ययस्य करणत्वमाह आकारोऽर्प्यते इति
यत्र बुद्धिपरिणामे विषयेणाकारोऽर्प्यते तदिह विषयाभिव्यक्तौ करणमुच्यते तत्
तु बाह्येंद्रियविशेषितांत तदर्थाकारा बुद्धिवृत्तिर्विषयप्रतीतिं प्रति करणमित्यर्थः
१९ श्लो॰ यदा भासेन संव्याप्तः स ज्ञातेति निगद्यते अयमेतद्धि विज्ञाता त्र्योजाना

तिस आत्मवित् २० टी॰ विषयकरणेष्वात्माध्यकलरिंव्युत्पादयति यदाभासे नेति यस्य
चिद्प्रतिबिंबस्याभासेन संव्याप्तोहंकारः परिणमते सचिदात्मप्रतिबिंबोज्ञातेति निग
द्यते कथ्यते एवं साक्ष्यं निर्दिश्य ततः साक्षिणं पृथगुपलंभयति अयमिति एतत्त्रयं
ज्ञाताज्ञानंज्ञेयं वेत्ति विविच्यासाधारण्येनावगम्या नत्रयेपरस्परापेक्षासिद्धिके
आगमापायिनि वर्तमानं स्वतः सिद्धं तदवधिभूतमनागमापायि साक्षिणं योजा
नाति सम्यगवगच्छति स आत्मवित् त्वंपदलक्ष्यप्रत्यगात्मविदितियोजना तदुक्तं श्री
भागवते एकमेकतराभावे यदानोपलभामहे त्रितयं तत्रयोवेद स आत्मास्वाश्रयाश्र
यइति २० श्लो॰ सम्यक्संशयमिथ्योक्ताः प्रत्ययाव्यभिचारिणः। एकेवान्नगतेस्ते
षुभेदस्तुप्रत्ययार्पितः २१ टी॰ विवेकप्रकारमेवविशदयति सम्यगिति स्पष्टार्थः २१
श्लो॰ आधिभेदाद्यथाभेदोमणेरनवगतेस्तथा अशुद्धिः परिणामश्चसर्वे प्रत्ययसंश्रया
त् २२ टी॰ भेदस्तुप्रत्ययार्पितइत्येतत्दृष्टान्तेनस्पष्टयति आधिभेदादिति मणेः स्फटि
कादेः प्रत्ययसंश्रयादहंकारप्रतिबिंबरूताभाससंश्रयान्निमित्तादित्यर्थः २२

श्लो॰ प्रथनंग्रहणंसिद्धिःप्रत्ययानामिहान्यतः अपरोक्षात्तदेवोक्तमनुमानंप्रदीप
वत् २२ टी॰ ननुप्रत्ययग्रहणग्राहकातिरिक्तात्मसिद्धौकिंप्रमाणमुक्तमेतावताभवती
त्यपेक्षायांतदाह प्रथनमिति प्रत्ययानांविषयाणांविषयाकाराणांजाग्रत्स्वप्नावस्था
नांप्रथनंस्फुरणंग्रहणमुपादानंस्थितिर्वाव्यवहारोवासिद्धिःस्वरूपलाभश्चेहव्यवहा
रभूमौअन्यतोऽन्यस्मादपरोक्षादपरोक्षस्वभावाद्भवितुमर्हति अचित्स्वभावत्वा
त्अचित्स्वभावत्वंचागमापायित्वात्प्रदीपादिवत् इत्येतदेवानुमानमिहोक्तमित्यर्थः
विमताःप्रत्ययाःस्वविलक्षणात्माधीनप्रथनग्रहणसिद्धिकाअचित्स्वभावत्वात्प्रदीपा
दिवदितिप्रयोगः एवंसामान्यतोदृष्टानुमानेनात्रायंपुरुषःस्वयंज्योतिरात्मैवास्य ज्यो
64 ज्योतिस्तस्यभासासर्वमिदंविभातीत्यादिश्रुतिप्रकाशआत्मनिसंभावनादार्ढ्य प्रसिद्ध
तेतिद्रष्टव्यं एवमनुमानमात्मन्युपन्यस्यविधिमुखेनप्रमाणेनात्मसिद्धिरु
क्तातत्रकेचिन्निषेधमुखेनैवप्रमाणेनात्मसिद्धिर्नविधिमुखेनापीतिमन्यंते
२३ श्लो॰ किमन्यद्ग्राहयेत्कश्चित्प्रमाणेनतुकेनचित् विनैवतुप्रमाणेननिवृत्या

श्लो॰ चेतनत्वं कथं देह इति चेन्नाप्रसिद्धितः चेतनस्यान्यतः सिद्धावेवं स्यादन्यहानतः २६

०स॰टी॰ न्यस्यत्रोपतः २४ टी॰ तन्मतनिराकरणाय विकल्पयति किमन्यादिति प्रथमस्तुश
१४७ ब्द एवकारार्थः द्वितीयस्तु नाशार्थः किं कश्चिद्वादिकेनाचेतमप्रमाणेनैव देहादिभ्यो
न्यदात्मतत्त्वं ग्राहयेत् किं वा प्रमाणेनाविनैवान्यस्यानिरत्या परिशेषत इति विकल्पा
र्थः २४ श्लो॰ शब्देनैव प्रमाणेन निवृत्तिश्चेद्विहोच्यते अध्यक्षस्याप्रसिद्धत्वात्कु
न्यतैव प्रसज्यते २५ टी॰ प्रथमपक्षे विधिमुखेनैव प्रमाणप्रवृत्तिः सिध्यतीतोऽहं
निःसहेतरामिप्रेत्य द्वितीयं न्यस्याह शब्देनेति शब्देन प्रमाणेनानात्मनिवृत्तिरेव
दिहोच्यत इति संबंधः तदाध्यक्षस्य अध्यक्षसद्भावस्यान्यतोऽप्रसिद्धत्वात्परिशेषाद्धे
२५ हेः शून्यतैवावशिष्येत नात्मेत्यर्थः ननु चेतनाचेतनयोर्विरुद्धरूपत्वात्कथं नैनान्य
निवृत्तिः शब्देन क्रियते तथा चाचेतनविरुद्धश्चेतनः परिशिष्यत इति न शून्यताप्र
संग इत्याशंक्य परिहरति चेतनत्वमिति अप्रसिद्धितो नैवमित्युक्तं साधयति चेत
नस्येति अयमर्थः सिद्धे हि धर्मिणि प्रतियोगिनि चायं नयं न भवतीति तादानिषेधे त्म्य
न विरुद्धरूपत्वोपदेशः स्यान्न वा चापि चेतनपदार्थः पृथक् सिद्ध इत्यनेनैवमतस्ताधनेन्यो॰ राम
भयं स्यादिति २६ मा
१४८

श्लो॰ अध्यक्षः स्वयमस्त्येव केनेन स्यापरोक्षता तुल्य एवं प्रबोधः स्यादन्यस्यासत्त
वादिना २७ टी॰ आत्मात्मनामत्यंतमप्रसिद्धस्तस्य स्वतःसिद्धत्वादित्याशंकते अध्य
क्ष इति चेतनस्य स्वतोऽपरोक्षत्वादित्यर्थः दूषयति तुल्य इति एवं सत्यन्यस्यासत्त्व
वादिनाशून्यवादिना तुल्यः समानः प्रबोधः स्याद्यथा शून्यवादिनः प्रमाणविना
स्वतःसिद्धशून्यमात्मेति न प्रबोधसिद्धिस्तथाध्यक्षस्यापि तत्त्वेत्यर्थः २७ श्लो॰
अहमज्ञासिषं वेदमिति लोकस्मृतेरिह करणं कर्मकर्तार्च सिद्धास्तेकक्षणे किल २८
टी॰ इदानीं स्मृतिबलेन स्वतःसिद्धाध्यक्षसिद्धिं शंकते अहमज्ञासिषमिति अहमि
65 दमज्ञासिषमिति व्यवहारे लोकस्य युगपत्स्मृतेर्दर्शनाद्दनुभूतेस्मृत्यभावात्करण
कर्मकर्तारस्त्रयोप्येकक्षणे प्राग्येनसिद्धाः सोस्याध्यक्षः स्वतःसिद्ध इति गम्यते किले
त्यनभिमतत्वद्योतनात्पूर्वपक्षताद्योतितेत्यर्थः २८ श्लो॰ प्रामाण्येपि स्मृतेःशे
ध्या यौगपद्यं विभाव्यते क्रमेण ग्रहणं पूर्वं स्मृतेःपश्चात्तथैव च २९ टी॰ एतन्नि
राकरोति प्रामाण्येपीति स्मृतेः पूर्वानुभवगमकत्वेन प्रामाण्येपि न युगपत्त्रितय

उ-स-टी- सिद्धिगमकत्वं यतः पूर्वक्रमेण कर्त्रादीनां ग्रहणमभूत्तथैव च पश्चादुत्तरकालं स्मृ
१४८ ते: संभवो ऽतः शैघ्र्यान्नैरंतर्येणाविलंबाद्यौगपद्यं विभाव्यते मृषैवेत्यक्षरार्थः अ
र्थद्वयस्यैकस्मृत्यवभास्यत्वे निश्चिते सत्येवं स्यान्नतु तन्निश्चेतुं शक्यते यतोहमि
दं जानामीति क्रमेण व्यपदिश्यते तो ग्राह्यस्फुरणस्य ग्राहकग्रहणाकारतासंभवा
त्तत्काले तयोर्न भानं संभवति एवं ग्राहकस्य प्रतीतः स्फुरणसमये ग्राह्यस्य परा
चो नास्ति स्फुरणं विरुद्धाकारद्वयस्यैकस्मिन्प्रमाणज्ञाने स्फुरणासंभवात्तथा ज्ञान
नै स्यापि विषयैकाकारत्वान्न स्फुरणे ज्ञातृस्फुर्त्तिरिति क्रमेणैव ज्ञात्रादिसिद्धिः भ्रा
गुन्वेपात स्मादुत्पलपत्रशतभेदेन यौगपद्याभिमानवद्युगपत्स्मृतिरित्यभि
मानः शैघ्र्यनिबंधन इति भावः २९ श्लो- अज्ञासिषमिदं मो वेत्यपेक्षा जायते
ध्रुवं विशेषापेक्ष्यते यत्र तत्र नैवैककालता ३० टी- स्मृतेर्यौगपद्याभावे कार
णांतरमाह अज्ञासिषमिति इदमित्याकारो हि प्रत्यगपेक्षयोल्लिख्यते तथामा
मिति पराग पेक्षयाधीजयिते तथान्वयत्र विशेषोन्यप्रतियोगिकोपेक्ष्यते तत्रै राम १४८

ककात्वत्तायोग्यपद्यं नैव घटत इत्यर्थः ३० श्लो॰ आत्मनो ग्रहणे चापि त्रया
णामिह संभवात्तु आत्मन्यासक्तं कर्तृत्वं न स्यात्करणकर्मणोः ३१ टी॰ स्मृतेर्वि
षयतः स्वरूपतश्च यौगपद्यासंभवात् कर्त्रादिसिद्धेर्व्याप्त्यानुमापकत्वानुपपत्तिरि
त्युक्तं संप्रति कर्त्रादीनां युगपदनुभवसाधनाभावादपि न युगपत्तत्सिद्धिसंभाव
नेत्याह आत्मन इति अयमर्थः यथा विषयस्य ग्रहणे कर्ता करणं कर्म चेति त्रि
तयमपेक्ष्यते एवं प्रत्येकं कर्त्रादिग्रहणे पि त्रितयमपेक्षणीयं तथा चात्मनः प्रमा
तुश्च कारणस्य प्रमेयस्य प्रमाणज्ञानस्य च ग्रहणे पि त्रयाणां कर्त्रादीनामिहापेक्षा
66 संभवात्तत्तत्कर्त्रादिस्फुरणमन्तरेण तत्तदर्थस्य तदनुभूतत्वनियमासिद्धेः कर्त्रा
द्यनवस्था प्रसज्येतेत्यर्थः तैरेव कर्त्रादिभिः स्वस्वरूपसिद्धिसंभवात्किमित्यनव
स्थेति शंकां वारयत्यात्मनीति आत्मन्येकस्मिन्नेव स्वसिद्धावासक्तमुपक्षीणं
यत्कर्तृत्वं तदेव करणकर्मणोः सिद्धौ तन्न स्यादित्यर्थः तथा चैकस्मिन्नवभासे
कर्त्रादिभावेनान्वीयमानानां तदेवावभासान्तरसाधनत्वान्वयायोगान्न कर्त्रादि

-स-टी- त्रितयस्ययुगपदनुभवसाधनसंभावनेति तदसिद्धितदवस्थेत्यर्थः ३१
१४९ श्लो- व्याप्तुमिष्टंचयत्कर्तुःक्रिययाकर्मतत्स्मृतं अतोहिकर्तृतन्त्रत्वंतस्येष्टंना
न्यतंत्रता ३२ टी- कर्त्रादीनांयुगपत्सिध्यभ्युपगमेव्याकरणविरोधोपिस्यादि
त्याह व्याप्तुमिति कर्तुःक्रिययापत्व्याप्तुमिष्टतमंतत्कर्मस्मृतं कर्तुरीप्सिततमंक
र्मेतिपाणिनिनास्मृतमित्यर्थः हियस्मादेवमतः तस्यकर्मणःसकलकारकप्रयोक्तृस्वतंत्र
कर्तृतंत्रत्वमिष्टंनतद्व्यतिरिक्ताध्यक्षतंत्रा: तदुक्तन्यायेनतत्साधकासिद्धेरित्यर्थः ३२
श्लो शब्दाद्वानुमितेर्वापिप्रमाणाद्वाततोन्यतः सिद्धिःसर्वपदार्थानांस्यादृष्टंप्रतिनो
न्यथा ३३ टी- तस्माद्विधिरूपेणप्रवृत्तत्वादेवप्रमाणादभिमतवस्तुसिद्धिर्नान्यनिषे
धमात्रावसानादितिनिर्णीतमित्युपसंहरति शब्दाद्वेति अन्यतोन्यस्मात्प्रत्यक्षादे
वेत्यर्थः ३३ श्लो- अध्यक्षस्यापिसिद्धिःस्यात्प्रमाणेनविनेववा विनास्वस्यप्रसिद्धि
स्तुनाज्ञंप्रत्युपयुज्यते ३४ टी- जडानांप्रवृत्तप्रमाणादेवसिद्धिरस्तुनस्वयंचेतनस्ये
त्याशंक्याह अध्यक्षस्यापीति येयमध्यक्षस्यसिद्धिरज्ञस्यसाप्रमाणाधीनानवे राम

१४९

स
तिविकल्प्यांस्येस्वरूपप्रकाशमात्रस्यविनाप्रमाणेनासिद्धावपिज्ञानेप्रत्यक्षतातस्यसि
ध्यतीतिदूषयति विनास्वस्येति ३४ श्लो· तस्यैवाज्ञत्वमिष्टंचेत्तज्ज्ञातत्वेन्यामति
र्भवेत् अन्यस्यैवाज्ञातायांवत्तद्विज्ञानेध्रुवाभवेत् ३५ टी· अध्यक्षस्वरूपम
पिविकल्प्यप्रमाणाधीनसिद्धिकतांतस्यदर्शयन्नाद्यंपक्षमभ्यनुजानाति तस्यै
वेति तस्यैवज्ञानरूपस्यचेतनस्यैवाज्ञत्वमिष्टंचेत्तर्हितस्यज्ञातत्वेचेतनत्वेन्याप्र
माणजन्यामतिरपेक्षणीयाभवेत् अन्यस्यैवाचेतनस्याहंकारस्यैवाज्ञातायांत
अध्यक्षवि द्विज्ञानेवान्यामतिर्ध्रुवाभवेत् इतियोजनाउभयथापिविधिमुखप्रमाणाधी
ज्ञाने नाध्यक्षसिद्धिरित्यर्थः ३५ श्लो· ज्ञाततास्वात्मलाभोवासिद्धिःस्यादन्यदेववा
ज्ञातत्वेनंतरोक्तोत्वंपक्षोसंस्मर्तुमर्हसि ३६ टी· अध्यक्षस्यसिद्धस्वरूपत्वान्माना
67 पेक्षानास्तीत्याशंक्यसिद्धिशब्दार्थएवतर्हिवक्तव्यइत्याह ज्ञाततेति किंज्ञानंसिद्धिः
स्वरूपलाभोवास्यादन्यदेववोभयान्यप्रकारोवेतिविकल्पार्थः तत्राद्येदोषमाह ज्ञात
त्वेइति अनंतरोक्तोतस्यैवाज्ञत्वमिष्टंचेदित्यादिनापूर्वश्लोकोक्तोपूर्वोक्तविकल्प

ई॰प्र॰टी॰ दूषणप्रसरान्नाद्यः कल्पः साधुरित्यर्थः ३६ श्लो॰ सिद्धिंस्यात्स्वात्मलाभश्चे
१५० द्यतस्तत्र निरर्थकः सर्वलोकप्रसिद्धत्वात्स्वहेतुभ्यस्तु वस्तुनः ३७ टी॰ द्वितीय
मनुवदूषयति सिद्धिःस्यादिति निरर्थकत्वे हेतुमाह सर्वलोकेति वस्तुनः सर्वस्य
स्वहेतुभ्यः स्वात्मलाभरूपा सिद्धिरिति सर्वलोकप्रसिद्धत्वात्तत्रप्रमातृमाणप्रया प्र
सो व्यर्थः स्यादित्यर्थः ३७ श्लो॰ ज्ञानज्ञेयादिवादैस्तैः सिद्धिर्ज्ञातृत्वमुच्यते अध्यक्षा
ध्यक्षयोः सिद्धिर्ज्ञेयत्वं नात्मलाभता ३८ टी॰ तृतीयं पक्षमप्रसिद्धिपराहतं मत्वा व
क्ष्यमाणपक्षविशेषज्ञापनार्थमुक्तपक्षं निगमयति ज्ञानज्ञेयादीति ज्ञानं ज्ञेयं
ज्ञाता चास्तीति यस्य वादस्तस्मिन्वादे ज्ञातृत्वमेव सिद्धिरुच्यते अध्यक्षाध्यक्षयो
स्तु पुनर्ज्ञेयत्वमेव सिद्धिर्न त्वात्मलाभ इत्यर्थः अध्यक्षस्यापीत्यादेरपरायोजना अ
हमज्ञासिषं चेदमित्यारभ्योपात्तग्रंथेन कर्तृकर्मकरणानां विधिमुखेन प्रवृत्तप्रमा पाम॰
णादेव सिद्धिर्नान्यथेति प्रासंगिकमुपपादितमुपसंहृत्याध्यक्षस्यापि परकृता १५०
विशेषात्प्रवृत्तप्रमाणादेव सिद्धिरिति प्रकृतमनुसरन्नाह अध्यक्षस्यापीति वा

शब्दः कटाक्षे अध्यक्षस्यापि दृष्टुरपि प्रमाणेन विनैव सिद्धिः स्यादिति योजना
नेव स्यादित्यर्थः चेतनत्वादध्यक्षस्य प्रमाणेन विना कथं न सिद्धिरित्यत आह वि
नेति प्रमाणेन विना स्वस्य वस्तुत्वं प्रसिध्येत्तु ज्ञानं प्रमितिं प्रत्युपयुज्यते ज्ञान
स्यैव स्वरूपस्फुरणे प्रमाणानपेक्षा न ज्ञातुरध्यक्षस्येत्यर्थः कथमिति चेत्तत्र वक्त
व्यं अध्यक्ष एवाज्ञः सन् प्रमाणेन विना अर्थसिद्धिं साधयिष्यति किं वान्योऽन्तःक
रणादिरिति अत्राद्यमनूद्य दूषयति तस्यैवेति चेतनस्याध्यक्षस्यैवेत्यर्थः ज्ञातत्वे
हमध्यक्ष इति ज्ञानवत्त्वेन्या मतिः प्रवृत्ति प्रमाणजन्या मतिरपेक्षिता भवेदागन्तुकसि
69 द्धेरन्यनिमित्तत्वादित्यर्थः द्वितीयमनूद्य दूषयति अन्यस्यैवेति तद्विज्ञान इति त
स्यान्यस्यान्तःकरणादेरध्यक्षविषयविज्ञाने प्रमाणजन्या मतिर्ध्रुवा भवेदिति योज
ना उभयथा विधिमुखेन प्रवृत्तप्रमाणादेवाध्यक्षसिद्धिरित्यर्थः ज्ञातत्वाज्ञानवत्त्वा
सिद्धिरिति पक्षे तस्यैवाज्ञत्वमिष्टं चेदिति पूर्वश्लोकोक्तविकल्पदूषणप्रसरणमनिवारणं
स्यादित्याह ज्ञातत्वेनं तरोक्ताविति यथाव्याख्यातोऽस्य पक्षापि इत्यर्थः अन्यसमानं ३८

उ-स-टी- श्लो- स्पष्टत्वं कर्मकर्त्रादेः सिद्धितायदि कल्प्यते स्पष्टतास्पष्टते स्यात्तामन्यस्यैव
१५१ नचात्मनः ३९ टी- ननुज्ञाततामलाभातिरिक्ताप्यस्तिस्पष्टतानामसिद्धिरतोनाप्र
सिद्धंपक्षोत्तरमितिभाट्टमतमाशंक्यपरिहरति स्पष्टत्वमिति स्पष्टत्वंप्राक...क रूप
मेकर्त्रादेः स्पष्टतास्पष्टतेअप्यन्यस्यैवकर्त्रादिविलक्षणस्यसाक्षिणश्चिदाभास
जननेनस्यातांनत्वात्मनः कर्त्रादिस्वरूपस्यजडत्वादित्यर्थः ३९ श्लो- अदृष्टुर्नै
वचांधस्यस्पष्टीभावोघटस्यतु कर्त्रादेः स्पष्टतेष्टाचेद्दृष्टताध्यक्षकर्तृका ४० टी-
एतदेवव्यतिरेकप्रदर्शनेनस्पष्टयति अदृष्टु अंधस्यदर्शनवृत्तिरहितस्याज्ञातु
र्विषयभूतस्यघटस्ययःस्पष्टीभावः सनैवज्ञानविषयतातिरिक्तोभट्टमतेसंभवती
त्यर्थः एवंसतिभट्टमतानुसारिणाकर्त्रादेः स्पष्टताप्रक...स्वरूपे...ष्टाचेत्तदादृष्टता
तद्विलक्षणाध्यक्षकर्तृकावश्यमेष्टव्यातस्मात्कर्मादेर्जडस्यस्पष्टतायाःप्रकाशा एम०
परपर्यायासंभवान्नस्पष्टताशिद्धिराह्यर्थः किंतुज्ञानविषयतेवेति कर्त्रादिमतचि १५१
दाभासनद्वारोदृधिष्ठानभूतश्चिदात्माविधिमुखेनैवप्रदीपादिदृष्टातानुमाना
तो

दिना प्रमाणेनावगंतव्य इति भावः ४० श्लो· अनुभूतेः किमन्यस्मिन्स्यात्तत्रापे
क्षयावद अनुभवितरीष्टास्यात्सोप्यनुभूतिरेव नः ४१ टी· अत्र कर्तृकर्मविहीनए
वप्रत्ययः स्वयमाभासतइतिवदन् विज्ञानवादी बौद्धः प्रत्यवतिष्ठते अनुभूतेति
अनुभूतेः संवेदनस्यान्यस्मिन् कर्त्रादावपेक्षयात्वकिं फलं स्यात्तद्दनकिंचित्फ
लं तस्याः स्वप्रकाशत्वादित्यर्थः अनुभवितरि आश्रयभूते सेष्यास्यात्तस्याः तदधि
नत्वदर्शनादितिचेत्तं ब्रूयास्तर्हि सोप्यनुभविता नोस्माकं मते अनुभूतिरेव न ततः पृ
69 थक् तस्सत्वे प्रमाणाभावादित्यर्थः ४१ श्लो· अभिन्नोपि हि बुध्यात्मा विपर्यासि
तदर्शनैः ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ४२ टी· कथं तर्ह्यनुभूतिरनुभवि
तानुभाव्य इति भेददर्शनमित्यत आह अभिन्नोपिहीति बुध्यात्मबुद्धिस्वभावोभि
न्नोप्येकोपि विपर्यासितदर्शनैः भ्रांतबुद्धिभिः पुरुषैर्ग्राह्यग्राहकसंवित्तिशब्दोग्रहण
शब्दपर्यायः ४२ श्लोक भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ४३ टी· बुद्धेः का
रकत्वानंगीकाराच्च न कर्त्राद्यपेक्षेत्याह भूतिरिति एषां मते या भूतिरनुभूतिः सैव क्रिया

१ भेदवानिव लक्ष्यते
प्रतीयते संवित्ति

ऽ.स.टी. सेवकारकमुच्यते क्षणभंगुरत्वेन विरम्य व्यापारयोगात्तेषां मतेक स्तस्याः स्वाति
१५२ रिक्तोपेक्षणीयः स्यादित्यर्थः ५३ श्लो॰ सत्वं नाशित्वमस्याश्चेत्सकर्तृत्वं तथेष्यतां
न कश्चिच्चेष्यते धर्म इति चेत्पक्षहानतः ५३ टी॰ प्रथममनुभूतेरन्यानपेक्षत्वं नि
राकरोति सिद्धांती सत्वमिति अनुभूतेरस्याः सत्वं स्वरूपसत्वे नाशित्वं क्षणभंगु
रत्वमिष्टं चेत्तर्हि तथा सकर्तृकत्वमपीष्यतां अनुभवस्यात्रापि सद्भावादित्य
र्थः अथ सत्वादिरपि धर्मो नेष्यते इति मतं तदा क्षणिकत्वपक्षस्याप्यसिद्धिरित्याह
न कश्चिदिति ५४ श्लो॰ नन्वस्तित्वादयो धर्मा नास्तित्वादिनिवृत्तयः न भूतेस्तर्हि
नाशित्वं स्वालक्षण्यं मतं हि ते टी॰ ननु नास्माभिर्विज्ञानस्य क्षणिकत्वादयो धर्मा
इष्यंते किं तु क्षणिकत्वाद्यपोहरूप एव क्षणिकत्वादिरिष्यते तो नोक्तदोष इति शंक
ते नन्विति निराकरोति नेति एवं चेत्तर्हि भूतेर्नाशित्वं न सिद्धं तर्हि यस्मात्तेत्व भूतेः राम
स्वालक्ष्यण्यं मतं स्वेनैव लक्ष्यते ज्ञायत इति स्वलक्षणं तस्य भावः स्वालक्ष्यण्यं निर्वि १५२
कल्पकमात्रमिति यावत् ततः सविकल्पकत्वात्क्षणिकत्वासत्वानाशित्वाद्युत्वादिव्या

वृत्तेरनुभूतेश्च सविकल्पज्ञानागोचरत्वान्नसत्वं नाशवत्वादिधर्मसिद्धिरित्यर्थः
७४ श्लो· स्वलक्षणावधिर्नाशो नाशोनाशनिवृत्तिता अगोरसत्वं गोत्वं तेनतु
तद्ग्रहोत्तलक्षण[illegible]णं ७५ टी· एतदेवस्फुटयति स्वलक्षणेति अयमर्थः कार्येवि
नष्टुपन्ननिरवधिनश्यति इदमत्रनास्तिइदमिदानींनास्तिनष्टमितिवानाशोव्यवह्रिय
ते यस्मात्तस्मात्किमप्यस्तिविनाशावधिभूतमविनश्यदनुत्पन्नंस्वतः सिद्धं चेयमभ्यु
पेयंतदेतदाह स्वलक्षणावधिर्नाशइति स्वरूपमेवलक्षणं प्रमाणधर्मोवायस्यस्व
10 लक्षणः सोवधिः सीमायस्यविनाशस्यसतथेतिविग्रहः तथाचत्वन्मतेआविर्भावति
रोभावयोरवधिभूतस्यास्थिरस्याभावान्नसत्वविनाशयोः सिद्धिरित्यर्थः किंचापो
हपक्षेन्योन्याश्रयश्चप्रसज्येतेत्याह नाशइति सिद्धेनाशेतद्विरोधिनो नाशस्यसि
द्धिस्तत्सिद्धेतदपोहरूपनाशासिद्धिरित्यर्थः यत्तुसामान्यमनभ्युपगच्छताबौद्धेनागो
र्व्यावृत्तिर्गोलक्षणमित्यभ्युपगम्यते तदनुपपन्नमन्योन्याश्रयस्यतादवस्थ्यादित्य
भिप्रेत्याह अगोरिति गोरन्यस्याश्वत्वादेरगोपदाभिधेयस्यासत्वं निवृत्तिरभावो

-स-टी-
१५३

गोत्वमितितेमतं तत्तुनगोत्वलक्षणंसिध्यति अश्वत्वस्यापिगोत्वव्यावृत्तिलक्षणत
यापरस्परापेक्षसिद्धित्वादित्यर्थः ४५ श्लो॰ क्षणवाच्योपियोर्थस्यात्सोप्यन्याभा
वएवते ४६ टी॰ अपोहवादेदोषांतरमाह क्षणवाच्योपीति अन्याभावो,क्षणिकाभा
वः क्षणिकइतितेप्रसज्यतेअतः,स्थिरोपिक्षणिकत्वाविरोधीत्वयाभ्युपगतः स्यादि
त्यर्थः ४६ श्लो॰ भेदाभावेप्यभावस्यभेदोनामभिरिष्यते नामभेदैरनेकत्व
मेकस्यस्यात्कथंतव ४७ टी॰ नन्वभावोनामनसत्तोनिवृत्तिरिष्यतेयेनातिप्रसं
गः स्यात् किंतुनिरूपाख्यगोत्वमेवान्यव्यावृत्यात्मनाभिलप्यतइतिशंकते भेदा
भावेति अभावस्यस्वरूपतोभेदाभावेपिअगोत्वमश्वत्वमनश्वत्वंगोत्वमित्यादि
नामभिःस्वरूपभेदइष्यतइत्यर्थः दूषयति नामभेदैरिति एकस्यनिःस्वभावस्या
भावस्यनामभेदैर्निरर्थकसंज्ञाभेदैरनेकत्वमनेकपदार्थासाधारणतयाव्यावृत्या राम॰
त्मकत्वंतवकथंघटेतइत्यर्थः ४७ श्लो॰ अपोह्यपदाभिन्नानांवृत्तिरूत्स्यकथंग १५३
वि नाभावाभेदकाः सर्वेचित्रोपावाकथंचन ४८ टी॰ किंचाभिन्नानांव्यावृत्तिरपो

हो भिन्नो वा तत्राद्यमनूद्य दूषयति अपोहयतीति भेदप्रतियोगिनामानंत्यात्तद
वगमं अन्तरेण तदपोहानवगमात्तस्यापोहस्य गवि वृत्तिः कथं सिध्येदिति शेषः तद
सिद्धौ च किंचिदभावस्य क्वचित्सुलभत्वाद्व्यवहारानियमप्रसंग इति भावः द्विती
यं दोषमाह नाभावा इति सर्वेऽपि भावा अजत्वाश्वत्वाद्यपोहरूपा न भेदकाः न गो
रितरेतरव्यावृत्तत्वबुद्धिजनकाः स्युस्तथा विशेषा वा भावरूपाः खंडमुंडत्वादयो भे
दकाः न स्युः भेदाभेदकयोर्भेदासिद्धेरित्यर्थः ४८ श्लो॰ नामजात्यादयोऽप्यद्य संविद
तो विशेषतः ४९ टी॰ एवं चापोहवादे खंडा गौर्नीलमुत्पलमित्यादि विशिष्टव्यवहा
रासिद्धिरयं गौरित्याद्यसाधारणस्वरूपव्यवहारासिद्धिश्च स्यादित्यभिप्रेत्यापोहनि
राकरणमुपसंहरति नामजात्यादय इत्यर्धेन नैतत्त्वमते संविदोऽविशेषतो निर्विशेष
त्वान्नामजात्यादयोऽप्यद्य न विशेषणं एवं गवादीनां अगवादिव्यावृत्तयः खंडादयो वा
न विशेषणमिति विशिष्टव्यवहारलोप एवेति जीवन्मावित्ते दुर्लभमिति भावः
४९ श्लो॰ प्रत्यक्षमनुमानं वा व्यवहारे यदीच्छसि क्रियाकारकभेदे स्वदभ्युपे

71

-स-टी- यं ध्रुवं भवेत् ५० टी- यदुक्तं भूतिर्येषां क्रिया सैवेस्तत्र संविदः क्रियाकारकभेदा
१५४ पेक्षा नास्तीति तत्प्रत्यक्षमनुमानं चेति प्रमाणद्वयाभ्युपगमं विरुद्धमित्याह
प्रत्यक्षमितिस्पष्टार्थः ५० श्लो- तस्मान्नीलं तथा पीतं घटादिर्वा विशेषणं संवि
दस्तु रूपं यस्याद्येन चाप्यनुभूतये ५१ टी- तथा च संवेदनातिरिक्तवेद्यवेदितृ
स्वरूपमनिष्टत्ताभ्युपेयमिति बौधमतनिराकरणमुपसंहरति तस्मादि
ति येन चाप्यनुभूतये सोऽपि ज्ञाताभ्युपेयः स्यादित्यर्थः ५१ श्लो- रूपादीनां य
थान्यः स्यात् ग्राह्यत्वाद्ग्राहकस्तथा प्रत्ययस्य तथान्यः स्याद्व्यंजकत्वात्प्रदीपवत्
५२ टी- संवित्साक्षिण्यनुमानं प्रमाणमाह रूपादीनामिति यद्ग्राह्यं तत्स्वान्यग्रा
ह्यं यथा रूपादिग्राह्या संविदिति बौद्धं प्रति प्रयोगो योऽन्यः तथा च भासकोऽवभास्या
दन्यो व्यंजकत्वात् घटादेः प्रदीपवदित्यास्तिकान् प्रयोक्तव्यमित्यर्थः यथा रूपादी राम
त नां ग्राह्याद्ग्राहकोऽन्यः स्यात्तथा प्रत्ययस्य ग्राह्यत्वाद्ग्राहकश्च ग्राह्यादन्यः स्याद्व्यंज १५४
कत्वात्प्रदीपवदिति श्लोकयोजना ५२ श्लो- अध्यक्षस्य दृशोः कीदृक् संबंधः सं

यथा

सत्रत्वमर्थस्य एवं तत्रतत्रान्यथा श्रूयमाणत्वात्कथमिहोद्देश्यविधेयनियमइ
त्याशंक्य वेदपदानामर्थवशादेव संबंधो न पाठवशात् [illegible] दाह
रपात्रं पात्रमाहरेतिवदर्थनियमं विवक्षन्नाह इदंपूर्वमिति श्लो॰ इदंपूर्वमिदंप
श्चात्परं वाक्यं भवेदिति नियमो नैव वेदेऽस्ति पदसांगत्यमर्थतः ७६ टी॰ पाठस्या
नियमेऽपि प्रसिद्धमुद्दिश्यानूद्याप्रसिद्धो बोध्यत इति न्यायादिदं प्रसिद्धार्थकत्व
महमादिपदं पूर्वमिदमप्रसिद्धार्थकं ब्रह्मसदादिपदं पश्चादित्येवं पदं विन्यस्तं
72 वाक्यं भवेदित्यन्वयव्यतिरेकाभ्यामवधार्यते ततो वाक्यार्थबोधनं त्वमर्थस्य त
दर्थात्मत्वप्रतिपत्तिरूपं भवेदित्यर्थः ७६ उक्तेऽर्थे हेतुमाह वाक्ये हीति श्लो॰
वाक्ये हि श्रूयमाणानां पदानामर्थसंस्मृतिः अन्वयव्यतिरेकाभ्यां ततो वाक्यार्थ
बोधनं ७७ टी॰ स्पष्टं ७७ आचार्येण ब्रह्मासीत्युपदिष्टः खलु शिष्यः कथम
हं ब्रह्म स्यामिति पृच्छति तदन्यथानुपपत्त्या वाक्यं साक्षाद्बोधजननसमर्थं न भवती
ति गम्यत इत्याशंक्याह यदा नित्येष्विति श्लो॰ यदा नित्येषु वाक्येषु पदार्थस्तु विवि

स·टी· व्यते वाक्यार्थज्ञानसंक्रांत्येतदाप्रश्नो नयुज्यते ७८ टी· नित्येषु अर्थाव्यभि
१६१ चारिष्विर्थः ७८ पदार्थतत्त्वानभिज्ञस्यैव प्रश्नो घटतइत्युक्तं स्पष्टयति अ
न्वयेति श्लो· अन्वयव्यतिरेकोक्तिः पदार्थस्मरणाय तु स्मृत्यभावेन वाक्यार्थो
ज्ञातुं शक्यो हि केनचित् ७९ टी· अन्वयव्यतिरेकोक्तिशब्देनावांतरवाक्यैस्तदनुक्
तैश्चैतत्कैरात्मानात्मविवेचनमुच्यते पदार्थस्मृतिः परोपस्थापितवाक्यार्थज्ञानका
रणमित्यत्र लोकप्रसिद्धिमाह स्मृत्यभावइति ७९ तत्रापि त्वंपदार्थविवेकेनैव प्र
यत्नः कार्यइत्यभिप्रेत्याह तत्वमस्यादीति त्रिभिः श्लोकैः स्पष्टं श्लो· तत्वमस्या
दिवाक्येषु त्वंपदार्थविवेकतः व्यज्यते नैव वाक्यार्थो नित्यमुक्तोहमित्यतः ८०
अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा त्वंपदार्थविवेके हि पाणावर्पितबि
ल्ववत् ८१ वाक्यार्थो व्यज्यते चैवं केवलोहं पदार्थतः दुःखी स्यां तदपोहेन प्र राम०
त्यगात्मविनिश्चयात् ८२ टी· विचारप्रयोजनं दर्शयत्यन्वयव्यतिरेकोक्तिरिति १६१
अनइति पूर्वश्लोकगतं परमस्मिन्योज्यं तद्विवेकाय त्वंपदार्थविवेकायेत्यर्थः

पदार्थविवेकफलं स्पष्टयति त्वंपदार्थविवेके हीति वाक्यार्थ इति कथं तयोर्भेदसं
सर्गभूर्ब्रह्म वाक्यार्थ इत्यन्वयः तत्र हेतुमाह अहंपदार्थस्तु दुःखीत्येतद्रूपोऽहेनेति
अहमिति प्रतीयमानात् पदार्थात् दुःखीत्येतस्येदमंशस्यापोहेन प्रत्यगात्मनः
साक्षिणो विशेषेण निश्चयादित्यर्थः ८२ उक्तेन न्यायेन वाक्यादेवापरोक्षा
खंडब्रह्मात्मज्ञानमुपपाद्येदानीं पूर्ववादिकल्पनाया निर्मूलत्वमाह तत्रैवमिति
श्लो· तत्रैवं संभवत्यर्थे श्रुतहानाश्रुतार्थधीः नैव कल्पयितुं युक्ता पदवाक्यार्थ
कोविदैः ८३ टी· स्पष्टं ८३ यथाव्याख्याने वाक्यस्य यथाश्रुतार्थसंभवाति
13 श्रुतहान्यादिकल्पनमनवकाशमित्युक्तं प्रत्यक्षादिविरुद्धार्थे वाक्यस्य बाधदर्शनादि
ति पूर्ववादीदृष्टान्तेन शंकते प्रत्यक्षादीनीति श्लो· प्रत्यक्षादीनि बाधेरन् कृष्णला
दिषु पाकवत् असज्जादिनि भेरेते: कथं स्याद्वाक्यबाधनं ८४ टी· यथा कृष्णलान्
श्रपयेत् इति कृष्णलशब्दवाच्यसुवर्णमयकणेषु श्रुतोऽपि पाकः प्रत्यक्षेण बाध्यते तेषु
विकृतेरदर्शनात् किंत्वदृष्टार्थ एव संस्कारस्तत्र पाकक्रियासाध्य एवमिहाप्यखंडार्थ

स-टी- तां वा कथं स्येति चेत्तत्रोत्तरमाह अक्षजादीति भवेदेवं यदि कर्तृत्वादेः प्रतिभासस्य
१६२ प्रत्यक्षप्रमाणतास्यान्नैतदस्ति अध्यस्ताहंकारद्युपरागमंतरेण स्वत आत्मनि
निर्दुःखित्वादिधर्मसंबंधस्य निराकृतत्वादतः प्रत्यक्षाद्याभासैरेतैः प्रमाणभूत
वाक्यबाधनं कथं स्यान्नैव स्यादित्यर्थः प्रयाजे प्रयाजे कृष्णलं जुहोतीति बैल्वम न
ज्ञानसंस्कृतस्यात्मनोन्यत्र विनियोगादर्शनादिहन संस्कारार्थत्वं वाक्यस्योपप
द्यते सर्वोब्रह्मत्वादर्शनं तु पदार्थमतिदार्ढ्याभावादित्युक्तमेवेति भावः ८४
नन्वेवं विरोधितालक्षणाप्रामाण्याभावेपि स्यादनुत्पत्तिलक्षणमप्रामाण्यं वा
क्यस्येति पूर्ववादीशंकते दुःख्यस्मीति श्लो- दुःख्यस्मीति सत्त्विज्ञाने निर्दुःखी
तिन जायते प्रत्यक्षादीनि भवेपि वाक्यान्न व्यभिचारतः ८५ टी- दुःखितादि
भानस्योक्तरीत्या प्रत्यक्षाद्याभासत्वेपि दुःख्यस्मीति विरोधिगंधिनि ज्ञाने सति वा एम७
क्यान्निर्दुःखीति विज्ञानं न जायत इति योजना पूर्वसिद्धतया प्रत्यक्षस्यासंजात १६२
विरोधित्वेन प्राबल्यमस्तीत्यभिप्रायः दूषयति न व्यभिचारत इति ८५ तमेव

व्यभिचारमाह स्वप्नइति श्लोक स्वप्ने दुःखमहमध्यासंदाहछेदादिहेतुतः त
त्कालभाविभिर्वाक्यैर्नबाधःक्रियतेयदि ८६ टी- स्वप्ने दाहच्छेदादिहेतुतो निमित्ताद
हं दुःख्यासंतदासोपदेशान्निर्दुःखोभूवमित्यनुभवसिद्धत्वादात्मधर्मो दुःखित्वादी
त्यर्थः तत्रपराभिनिवेशमनुवदतितत्कालेति ८६ तथापिदुःखमात्मव्यभिचारीत्याह
समाप्तेइति श्लो॰ समाप्तेर्हिदुःखस्य प्राक्तद्बाधइष्यतां नहिदुःखस्यसंतानो
भ्रांतेर्वादृश्यतेक्वचित् ८७ टी- दुःखस्यसमाप्तेरूर्ध्वंतद्बाधोदुःखबाधइष्यते
74
एवंप्राक्पूर्वमपिदुःखंनाभूदितितद्बाधइष्यतांमध्येदृश्यमानस्यशुक्तिरूप्यव
न्मिथ्यात्वंवद्व्यभिचारादित्यर्थः कुतोबाधइष्यतामित्यत्रहेतुमाह नहीति भ्रांतेर्वत्तिदृष्टां
तू
तार्थोवा [illegible] स्मा दुःखित्वादेरात्मनिमतिर्व्यभिचाराद्दागंतुकस्यनवाविकारिण्यात्म
न्यनुपपत्तेरारोपितत्वसिद्धेः प्रमाणज्ञानंशुक्तितत्त्वज्ञानमिवरजतादिबाधनंकुर्वदे नदुःखिता
ववाक्यादुदेतीतिनवाक्यस्यासामर्थ्यशंकावकाशइतितात्पर्यार्थः ८७ इतश्चवाक्य बाधने
नप्रत्यक्षात्दुर्बलमित्याह प्रत्यगात्मेइति श्लो॰ प्रत्यगात्मनआत्मत्वंदुःखस्यौत्यस्य
नं

सादयेऽस्मां ९४ टी॰ तत्त्वमस्यादिवाक्येषु त्वंपदार्थविवेकतः व्युत्पत्त्यनेनैव वाक्
र्थदृष्टत्वं प्रपंचयन् त्वंपदार्थविवेचनेऽप्रयत्नाधिक्यं सूचयति वाक्ये तत्त्वमित
पदत्रयात्मके स्मिन्वाक्ये तत्पदमसिपदं चेति द्वयं ज्ञातार्थं प्रसिद्धार्थं तत्त्वमर्थे सि
पदार्थे सत्यविज्ञाते साहाय्येन तु साहायशून्यत्वात् सहकारिविरहाद्वाक्यमेत
त्प्रमां नोत्पादयेदपरोक्षनिश्चयरूपामित्यर्थः ९४ असिपदस्योपयोग
माह तत्त्वमोरिति श्लो॰ तत्त्व[illegible] तुल्यनीडार्थ[illegible]स्यैतत्स्यादं भवेत् तच्छब्दः
प्रत्यगा[illegible]र्थस्तच्छब्दार्थस्त्वंपदं [illegible] ९५ टी॰ तुल्यनीडार्थकं रुचितये [illegible]
स्यादिक्रियया [illegible]क्षानिवारणे नसामानाधिकरण्यसिद्धेश्चयालंबनत्वस्पष्टीक
रणार्थं म[illegible]त्वमसीत्यादिपदमुपयुज्यत इत्यर्थः ९५ निराकांक्षे सामानाधिकरण्या
सिद्धिकोसाभ इत्यपेक्षायामाह तच्छब्द इति प्रत्यगात्मार्थो यस्य स प्रत्यगा
त्मार्थस्तच्छब्दः स्यात् त्वंपदेन सामानाधिकरण्यादिति योज्यं तथा त्वमस्त्वंप
दस्य तच्छब्दार्थोर्थो भवेत् तत्पदेन सामानाधिकरण्यादिति योजना तदा वा

15